ताम् । ॐ अप्सरसस्तृ० । ॐ देवानुगास्तृ० । ॐ नागास्तृ० । ॐ सागरास्तृ० । ॐ पर्वतास्तृ० । ॐ सरितस्तृ० । ॐ मनुष्यास्तृ० । ॐ यक्षास्तृ० । ॐ रक्षांसि तृ० । ॐ पिशाचास्तृ० । ॐ सुपर्णास्तृ० । ॐ भूतानि तृ० । ॐ पशवस्तृ० । ॐ वनस्पतयस्तृ० । ॐ ओषधयस्तृ० । भूतग्रामश्चतुर्विधस्तृप्यताम् । ॐ मरीचिस्तृप्यताम् । अत्रिस्तृ० । ॐ अङ्गिरास्तृ० । ॐ पुलस्त्यस्तृ० । ॐ पुलहस्तृ० । ॐ क्रतुस्तृ० । ॐ प्रचेतास्तृ० । ॐ वशिष्ठस्तृ० । ॐ भृगुस्तृ० । ॐ नारदस्तृ० । ततः कण्ठे सूत्रं कृत्वा निवीती उदङ्मुखः कायतीर्थवर्तिना सकुशोदकेनाञ्जलौ तिरश्चः कुशान् कृत्वा मनुष्याँस्तर्पयेत् । ॐ भूर्भुवः स्वः सनकादयः सप्त मनुष्या इहागच्छन्त्विह तिष्ठन्तु गृह्णन्त्वेताञ्जलाञ्जलीन् । इत्यावाह्य द्वौ द्वौ जलाञ्जली दत्त्वा तर्पयेत्—ॐ सनकस्तृप्यताम् २ ।

ॐ सनन्दनस्तृ० २। ॐ सनातनस्तृ, २। ॐ कपिलस्तृ० २। ॐ आसुरिस्तृ० २। ॐ वोढुस्तृ० २। ॐ पञ्चशिखस्तृ०। ततोऽपसव्येन प्राचीनावीती दक्षिणाभिमुखः पातितवामजानुर्मोटितकुशाञ्जलित्रयेण पितृतीर्थेन खड्गपात्रेण च दिव्यपितृनावाह्य तर्पयेत्। ॐ उशन्तस्त्वा निधीमह्यु शन्तः समिधीमहि॥ उशन्नुशत ऽआवह पितॄन् हविषेऽअत्तवे॥१॥ ॐ आयन्तु नः पितरः सोम्यासोग्निष्वात्ताः पथिभिर्देवयानैः॥ अस्मिन्यज्ञे स्वधया मदन्तोधिब्रुवन्तु तेवन्त्वस्मान्॥ ॥२॥ इति मन्त्रद्वयं पठित्वा, ॐ कव्यवडनलादयो दिव्यपितर इहागच्छन्तु, इह तिष्ठन्तु गृह्णन्त्वे-ताञ्जलाञ्जलीन् त्रिभिस्त्रिभिरञ्जलिभिस्तर्पयेत्—ॐ कव्यवाडनलस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ३। ॐ सोमस्तृ० १। ॐ यमस्तृ० ३। ॐ अर्यमास्तृ० ३। ॐ अग्निष्वात्तास्तृप्यन्तामिदं तिलोदकं तेभ्यः

स्वधा नमः ३। ॐ सोमपास्तृ० ३। ॐ बर्हिषदस्तृ० ३।
ॐ यमाय नमः ३। ॐ धर्मराजाय नमः ३। ॐ मृत्यवे० ३।
ॐ अन्तकाय० ३। ॐ वैवस्वताय० ३। ॐ कालाय० ३।
ॐ सर्वभूतक्षया० ३। ॐ औदुम्बराय० ३। ॐ दध्नाय० ३।
ॐ नीलाय० ३। ॐ परमेष्ठिने० ३। ॐ वृकोदराय० ३।
ॐ चित्राय० ३। ॐ चित्रगुप्ताय नमः ३। ततः आगच्छन्तु मे पितर इमान् गृह्णन्त्वपोऽञ्जलीनिति पितॄनावाह्य तर्पयेत्। ॐ उदीरतामवरऽउत्परासऽउन्मध्यमाः पितरः सोम्यासः॥ असुंय्यऽईयुरवृकाऽऋतज्ञास्तेनोवन्तु पितरो हवेषु॥ ॐ अद्येहा[1]ऽमुकगोत्रोऽस्मत्पिताऽमुकशर्मा वसुस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा इति प्रथमाञ्जलिं पित्रे दद्यात्।

---

१. अद्येहास्मत्पितामुकशर्माऽमुकगोत्र इति वाक्योल्लेखः साधीयान् इति केचित्। एवमेवाग्रेऽपि।

ॐ अङ्गिरसो नः पितरो नवग्वाऽअथर्वाणो भृगवः सोम्यासः ॥ तेषां व्वय ꣳ सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥ अनेन मन्त्रेण पूर्ववद् द्वितीयाञ्जलिं पित्रे दद्यात् । ॐ आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः ॥ अस्मिन्यज्ञे स्वधया मदन्तोधिब्रुवन्तु तेवन्त्वस्मान् ॥ अनेन मन्त्रेण पूर्ववत् तृतीयाऽञ्जलिं पित्रे दद्यात् । ॐ ऊर्ज्जं वहन्तीरमृतं घृतम्पयः कीलालं परिस्रुतम् ॥ स्वधास्थ तर्पयत मे पितॄन् । ॐअद्येहामुकगोत्रोऽस्मत्पितामहोऽमुकशर्मा रुद्रस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा । इति पितामहाय प्रथमाञ्जलिं दद्यात् । पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः । अक्षन्पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरः पितरः शुन्धध्वम् ॥ अनेन मन्त्रेण पितामहाय पूर्ववद्द्वितीयाञ्जलिं

दद्यात् । ॐ ये चेह पितरो ये च नेहयाँश्च विद्मयाँऽउचन प्रविद्म ॥ त्वं व्वेत्थयति ते जातवेदः स्वधाभिर्यज्ञ ६ सुकृतञ्जुषस्व ॥ अनेन मन्त्रेण पितामहाय पूर्ववत्तृतीयाञ्जलिं दद्यात् । ॐ मधुव्वाताऽऋतायते मधु क्षरन्ति सिन्धवः ॥ माध्वीर्नः सन्त्वोषधीः । ॐ अद्येहामुकगोत्रोऽस्मत्प्रपितामहोऽमुकशर्मा आदित्यस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा । इति प्रपितामहाय प्रथमाञ्जलिं दद्यात् । ॐ मधुनक्तमुतोषसो मधुमत्पार्थिव ६ रजः ॥ मधु द्यौरस्तु नः पिता ॥ अनेन मन्त्रेण पितामहाय पूर्ववद्द्वितीयाञ्जलिं दद्यात् । ॐ मधुमान्नो व्वनस्पतिर्मधुमाँऽअस्तु सूर्यः ॥ माध्वीर्गावो भवन्तु नः । अनेन मन्त्रेण प्रपितामहाय पूर्ववत् तृतीयाञ्जलिं दद्यात् ॥ ॐ आमावाजस्य प्रसवो जगम्यादेमे द्यावापृथिवीविश्वरूपे ॥ आमागन्ताम्पितरामातरा चामासोमोऽअमृतत्वेन गम्यादिति मन्त्रं पठित्वा-

ॐ अद्येहामुकगोत्राऽस्मन्मातामुकदेवी वसुस्वरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा इति त्रिः । ॐ अद्येहाऽमुकगोत्रास्मत्पितामही अमुकदेवी रुद्र-स्वरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा इति त्रिः । ॐ अद्येहाऽमुकगो-त्राऽस्मत्प्रपितामही अमुकदेवी आदित्यस्वरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा इति त्रिः । ॐ नमो वः पितरो रसाय नमो वः पितरः शोभाय नम वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्तासतो वः पितरो देष्मैतद्वः पितरो वास‍ः ॥ ॐ अद्येहाऽमुकगोत्रोऽस्मन्माता-महोऽमुकशर्मा वसुस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा । इति प्रथमाञ्जलिं मातामहाय दद्यात् । ॐ नमो वः० इति मन्त्रेण ॐ अद्ये-हाऽमुकगोत्रोऽस्मत्प्रमातामहोऽमुकशर्मा रुद्रस्वरूपस्तृप्यतामिदं तिलोदकं

तस्मै स्वधा । इति प्रमातामहाय प्रथमद्वितीयतृतीयाञ्जलीन् दद्यात् । ॐ नमो वः० इति मन्त्रेण अद्येहाऽमुकगोत्रोऽस्मद्वृद्धप्रमातामहोऽमुकशर्मा आदित्यस्वरूपस्तृप्यमामिदं तिलोदकं तस्मै स्वधा । इति वृद्धप्रमातामहाय प्रथमद्वितीयतृतीयाञ्जलीन् दद्यात् । ॐ नमो वः० इति मन्त्रेण ॐ अद्येहाऽमुकगोत्रास्मन्मातामही अमुकदेवी वसुस्वरूपा तृप्यतामिदं तिलोदकं तस्यै० इति त्रिः । ॐ अद्येहामुकगोत्राऽस्मत्प्रमातामही अमुकदेवी रुद्रस्वरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा इति त्रिः । ॐ अद्येहाऽमुकगोत्राऽस्मद्वृद्धप्रमातामही अमुकदेवी आदित्यस्वरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा इति त्रिः । ततः निर्दिष्टश्लोकाऽनुसारेण अन्यांश्च संबन्धिनः पितॄन् तर्पयेत् ।

तातामबात्रितयं सपत्नजननी मातामहादित्रयम् । सस्त्रि स्त्रीतनयादि तातजननीस्वभ्रातरः सस्त्रियः ॥ तातामबात्मभगिन्यपत्यधवयुक् जाया-

पिता सद्गुरुः । शिष्यासाः पितरो महालयविधौ तीर्थे तथा तर्पणे ॥ इति यस्य ये जलदानार्हास्तांस्तर्पयित्वा । ॐ आब्रह्मस्तम्बपर्यन्तं देवर्षिपितृमानवाः ॥ तृप्यन्तु पितरः सर्वे मातृमातामहादयः ॥ १ ॥ पितृवंशे मृता ये च मातृवंशे तथैव च ॥ गुरुश्वशुरबन्धूनां ये चान्ये बान्धवा मृताः ॥ २ ॥ ते तृप्तिमखिला यान्तु ये चास्मत्तोयकांक्षिणः ॥ येऽबान्धवा बान्धवा वा येऽन्यजन्मनि बान्धवाः ॥ ३ ॥ ते सर्वे तृप्तिमायान्तु मद्दत्तेनाम्बुनाखिलाः ॥ देवासुरास्तथा यक्षा नागा गन्धर्वराक्षसाः ॥ ४ ॥ पिशाचा गुह्यकाः सिद्धाः कूष्माण्डास्तरवः खगाः । जलेचरा भूमिचरा वाय्वाहाराश्च जन्तवः ॥ ५ ॥ ते तृप्तिमखिला यान्तु मद्दत्तेनाम्बुनाऽखिलाः ॥ नरकेषु समस्तेषु यातनासु च ये स्थिताः ॥६॥ तेषामाप्यायनायैतद्दीयते सलिलं मया ॥ अतीतकुलकोटीनां सप्तद्वीप-

निवासिनाम् ॥ ७ ॥ आब्रह्मभुवनाँल्लोकानिदमस्तु तिलोदकम् ॥
यत्र क्वचनसंस्थानं क्षुत्तृष्णोपहतात्मनाम् ॥८॥ इदमक्षय्यमेवाऽस्तु मया
दत्तं तिलोदकम् ॥९॥ अथ वस्त्रनिष्पीडनम् ॥ ये के चास्मत्कुले जाता
अपुत्रा गोत्रिणो मृताः ॥ ते पिबन्तु मया दत्तं वस्त्रनिष्पीडनोदकम् ॥
ततः सव्यं कृत्वा पूर्वाभिमुखो भूत्वा आचम्य षट्सु कोणेषु ब्रह्मादीन्
पूजयेत् । ॐ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोव्वेनऽआवः ॥ स
बुध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमसतश्च व्विवः । ॐ ब्रह्मणे नमः ।
ॐ इदं व्विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाᳯ सुरे स्वाहा ।
ॐ विष्णवे नमः । ॐ नमस्ते रुद्रमन्न्यवऽउतोतऽइषवे नमः ॥ बाहुब्भ्या-
मुतते नमः । ॐ रुद्राय नमः । ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो
देवस्य धीमहि । धियो यो नः प्रचोदयात् । ॐ सवित्रे नमः । ॐ मित्रस्य

चर्षणी धृतो वो देवस्यसानसि ॥ द्युम्नं चित्रश्रवस्तमम् । ॐ मित्राय नमः । ॐ व्वरुणस्योत्तम्भनमसि व्वरुणस्य स्कम्भसर्ज्जनीस्त्थों व्वरुणस्यऽऋतसदन्न्यसि व्वरुणस्यऽऋतसदनमसि व्वरुणस्यऽऋतसदनमासीद ॥ ॐ वरुणाय नमः । ॐ एहि सूर्य सहस्रांशो तेजोराशे जगत्पते । अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिवाकर ॥ अनेन मन्त्रेण सूर्यायार्घ्यं दद्यात् ॥ ॐ अदृश्रमस्य केवतो व्विरश्मयो जनाँऽअनु भ्राजन्तोऽअग्नयो यथा । उपयामगृहीतोसि सूर्यायत्वा भ्राजायैषते योनिः सूर्यायत्वा भ्राजाय ॥ सूर्य्य भ्राजिष्ठ भ्राजिष्ठस्त्वन्देवेष्वसि भ्राजिष्ठोहम्मनुष्येषु भूयासम् ॥ ॐ ह ६० सः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जागोजा ऋतजाऽअद्रिजा ऋतम्बृहत् ॥ इति मन्त्राभ्यां सूर्यमुपस्थाय प्रदक्षिणीकृत्य दिग्भ्यो दिग्-

देवेभ्यश्च प्रणमेत् ॥ ॐ प्राच्यै दिशे नमः, ॐ इन्द्राय नमः । ॐ आग्नेय्यै दिशे नमः, ॐ अग्नये नमः । ॐ दक्षिणायै दिशे नमः, ॐ यमाय नमः । ॐ नैर्ऋत्यै दिशे नमः, ॐ निर्ऋतये नमः । ॐ प्रतीच्यै दिशे नमः, ॐ वरुणाय नमः । ॐ वायव्यै दिशे नमः, ॐ वायवे नमः । ॐ उदीच्यै दिशे नमः, ॐ कुबेराय नमः । ॐ ऐशान्यै दिशे नमः, ॐ ईशानाय नमः । ॐ ऊर्ध्वायै दिशे नमः, ॐ ब्रह्मणे नमः । ॐ अधोदिशे नमः, ॐ अनन्ताय नमः । ततः उपविश्य नमेत्[1] । ॐ ब्रह्मणे नमः । ॐ अग्नये नमः । ॐ पृथिव्यै नमः । ॐ ओषधिभ्यो नमः । ॐ वाचे नमः । ॐ वाचस्पतये नमः । ॐ विष्णवे नमः । ॐ महद्भ्यो नमः । ॐ अद्भ्यो नमः । ॐ अपांपतये नमः ।

१. तर्पयेदिति हरिहरः । नमेदिति मयूखकारः ।

ॐ वरुणाय नमः । ॐ संव्वर्च्चसा पयसा सन्तनूभिरगन्महि मनसा स६० शिवेन ॥ त्वष्टासुदत्रो व्विदधातुरायोनुमार्ष्टुतन्वोयद्विलिष्टम् । इति मन्त्रेण मुखमभिपृश्य । ॐ तच्चक्षुर्द्देवहितम्पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येम शरदः शतं जीवेम शरदः शत६० शृणुयाम शरदः शतम्प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ॥ इति मन्त्रेणानामिकाङ्गुष्ठाभ्यां जलं स्पृष्ट्वा चक्षुःस्पर्शः कार्यः ॥ ॐ देवाः गातु विदो गातुं वित्वा गातुमित ॥ मनसस्पतऽइमन्देव यज्ञ६० स्वाहा वातेधाः । इति मन्त्रेण पितॄन् विसर्जयेत् ॥ इति संक्षिप्ततर्पणविधिः ॥

—:❀:—

एकोद्दिष्टश्राद्धविधिः

श्राद्धकालः

पूर्वाह्णे मातृकं श्राद्धमपराह्णे तु पैतृकम् ॥ एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम् ॥ एकं पवित्रं एकोऽर्घं एकपिण्डो नावाहनाग्नौकरणे नात्र विश्वेदेवाः । तद्यथा— एकोद्दिष्टं दैवहीनमेकार्घैकपवित्रकम् । आवाहनाग्नौकरणरहितं ह्यपसव्यवत् ॥ इति स्मृतिः ।

अथ प्रयोगः ॥ आचम्य गोमयोपलिप्ते प्राङ्गणे दीपं प्रज्वाल्य अपसव्यं कृत्वा पितृतीर्थेन[1] ताम्बूलादिकं विप्रहस्ते दत्त्वा दक्षिणाभिमुखो भूत्वा उदङ्मुखस्य पितृब्राह्मणस्य वामजानु स्ववामहस्तेन स्पृष्ट्वा स्ववामजानु च पातयित्वा निमन्त्रयेत् । ॐ अद्येत्यादि अमुकगोत्रस्याऽस्मत्पितुर[2]-

---

१. देवतीर्थेन दैवं तत् पितृतीर्थेन पैतृकम् ।—सिन्धुः ।

२. मातुः श्राद्धे तु—ॐअद्येत्यादि अमुकगोत्राया अस्मन्मातुः अमुकदेव्या वसुस्वरूपाया अद्यकर्तव्ये-त्यादि पठनीयम् ।

मुकशर्मणः वसुस्वरूपस्याऽद्यकर्तव्यसांवत्सरिकैकोद्दिष्टश्राद्धे अनेन ताम्बूल-गन्धपुष्पाक्षतेन त्वं मया निमन्त्रितः 'ॐ निमन्त्रितोऽस्मि' । इति प्रति-वचनम् । ॐ अक्रोधनैः शौचपरैः सततं ब्रह्मवादिभिः । भवितव्यं भव-द्भिश्च मया च श्राद्धकारिणा ॥ सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः । भवितव्यं भवद्भिर्नोऽद्यतने श्राद्धकर्मणि ॥ ॐ 'भवितव्यम्' इति प्रतिवचनम् । ततो ब्राह्मणचरणौ प्रक्षालयेदनेन मन्त्रेण—ॐ नमोस्त्वनन्ताय सहस्र-मूर्तये सहस्रपादाक्षिशिरोरुबाहवे ॥ सहस्रनाम्ने पुरुषाय शाश्वते सहस्र-कोटीयुगधारिणे नमः ॥ यत्फलं कपिलादाने कार्तिक्यां ज्येष्ठपुष्करे । तत्फलं पाण्डवश्रेष्ठ ! विप्राणां पादशौचने ॥ ततो मोटकादिकमादाय—ॐ अद्यामुकगोत्राऽस्मत्पितरमुकशर्मन् वसुस्वरूपाद्यकर्तव्यसांवत्सरि-कैकोद्दिष्टश्राद्धे एष पादार्घस्ते स्वधा । ततः सव्येनाऽऽचम्य गृहं प्रवेशयेत् ।

अपसव्येन 'ॐ आगता यूयम्' 'ॐ सुस्वागता वयम्' 'ॐ इदमासनमास्यताम्' 'ॐ आसे' इति प्रतिवचनम् । ब्राह्मणमुदङ्मुखमुपवेशयेत् । 'ॐकर्मपात्रमहं करिष्ये' 'ॐकुरुष्व' इत्यनुज्ञातः सन् । ॐयद्देवादेवहेडनमिति कण्डिकात्रयेण पवित्र गन्धादिकं च स्वस्वमन्त्रैः क्षिप्त्वा कर्मपात्रं कुर्यात् तत्र मन्त्राः—ॐ यद्देवादेवहेडनन्देवासश्च कृमा व्वयम् । अग्निर्मातस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ॥ १ ॥ ॐ यदि दिवा यदि नक्तमेनाꣳसि च कृमा व्वयम् ॥ व्वायुर्म्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ॥२॥ ॐ यदि जाग्रद्यदिस्वप्नऽएनाꣳसि च कृमा व्वयम् ॥ सूर्योमा तस्मादेनसो व्विश्वान्मुञ्चत्वꣳहसः ॥ ३ ॥ पवित्रेस्थो व्वैष्णव्यौ सवितुर्व्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः ॥ इति-मन्त्रेण पवित्रं क्षिपेत् । ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये ॥

शंय्योरभिस्रवन्तु नः ॥ इति मन्त्रेण जलम् । ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः ॥ प्रत्नमद्भिः पृक्तः स्वधया पितृँल्लोकान् पृणाहि नः स्वाहा । इति मन्त्रेण तिलान् । ॐ श्रीश्चते लक्ष्मीश्चपत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण । इति मन्त्रेण पुष्पाणि । ॐ गन्धद्वारान्दुराधर्षान्नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् । इति गन्धम् । ॐ अक्षन्नमीमदन्तह्यवप्रिया॒ऽअधूषत । अस्तोषत स्वभानवो विप्रानविष्ठया मती यो जान्विन्द्रते हरी । इति अक्षतान् । ततः सव्येन कुशत्रयसहितं कर्मपात्रोदकमादाय—ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा । यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः। ॐ 'पुण्डरीकाक्षः पुनातु' इत्युक्त्वा श्राद्धदेशं द्रव्याणि आत्मानं च सिञ्चेत । तत कुशादिकमादाय—

इत्युक्त्वा श्राद्धदेशं द्रव्याणि आत्मानं च सिञ्चेत् । ततः कुशोदकमादाय—

ॐ अद्येत्यादि अमुकगोत्रस्यास्मत्पितुरमुकशर्मणः वसुस्वरूपस्याद्यकर्तव्य-सांवत्सरिकैकोद्दिष्टश्राद्धमेभिर्द्रव्यैरहं करिष्ये इति संकल्प्य ॥ ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च । नमः स्वाहायै स्वधायै नित्यमेव नमो नमः । इति त्रिः पठित्वा, सप्त व्याधा दशार्णेषु मृगाः कालञ्जरे गिरौ । चक्रवाकाः सरद्वीपे हंसाः सरसि मानसे ॥ १ ॥ तेऽपि जाता कुरुक्षेत्रे ब्राह्मणाः वेदपारगाः ॥ प्रस्थिता दीर्घमध्वानं यूयं किमवसीदथ ॥ २ ॥ ये विप्रमुख्याः कुरुजाङ्गलेषु जातास्तथा दासकुले मृगाश्च ॥ कालञ्जरे सप्त च चक्रवाका ये मानसे ते वयमत्र सिद्धाः ॥ ३ ॥ पञ्चकोशं गयाक्षेत्रं क्रोश-मेकं गयाशिरः ॥ यत्र यत्र स्मरेद् विद्वान् पितॄणां दत्तमक्षयम् ॥ ४ ॥ श्राद्धभूमौ गयां ध्यात्वा तथा देवं गदाधरम् ॥ उभाभ्यां च नमस्कृत्य ततः श्राद्धं समारभेत् ॥ ५ ॥ गया गयो गयादित्यो गायत्री च गदाधरः । गया

गयासुरश्चैव षड्गया मुक्तिदायकाः ॥ ६ ॥ ईशानविष्णुकमलासनकार्त्ति-केयवह्नित्रयार्करजनीशगणेश्वराणाम् ॥ क्रौञ्चामरेन्द्रकलशोद्भवकश्यपानां पादान्नमामि सततं पितृमुक्तिहेतोः ॥ ७ ॥ ॐ गयायै नमः । ॐ गदा-धराय नमः । इति पठित्वा, अपसव्येन दिग्बन्धनं कुर्यात् । तिलसहित-मोटकमादाय तिलान् पूर्वादिक्रमेण वक्ष्यमाणमन्त्रैर्विकिरेत् । ॐ अग्नि-ष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम् । ॐ अपहताऽअसुरा रक्षाꣳसि व्वेदिषदः । तथा ॐ बर्हिषदः पान्तु याम्यां ये पितरः स्थिता । ॐ अपहताऽ असुरा रक्षाꣳसि व्वेदिषदः । ॐ प्रतीचीमाज्यपास्तद्वत् । ॐ अपहताऽ असुरा रक्षाꣳसि व्वेदिषदः । ॐ उदीचीमपि सोमपाः । ॐ अपहताःअसुरा रक्षाꣳसि व्वेदिषदः । ॐ ऊर्ध्वतस्त्वर्यमा रक्षेत् कव्यवाडनलोऽप्यधः । ॐ रक्षोभूतपिशाचेभ्यस्तथैवाऽसुरदोषतः ॥ सर्वतश्चाधिपस्तेषां यमो रक्षां

करोतु मे ॥ मोटकं वामकट्यां नीव्यां[1] धारयेदनेन मन्त्रेण—ॐ निहन्मि सर्वं यदमेध्यवद्भवेद्धताश्च सर्वेऽसुरदानवा मया ॥ रक्षांसि यक्षाः सपिशाचगुह्यका हता मया यातुधानाश्च सर्वे ॥ इति दिग्बन्धनम् । तिलसहितकुशखण्डत्रयं गृहीत्वा—प्रयान्तु दूरतः सर्वे दैत्येया दानवास्तथा ॥ सर्वविघ्नोपशान्त्यर्थं क्षिपामि च कुशाँस्तिलान् ॥ इति मन्त्रेण दक्षिणस्यां क्षिपेत् ॥ ततः सव्येन विष्णुस्मरणम्—ॐ नमो नमस्ते गोविन्द पुराण पुरुषोत्तम ॥ इद श्राद्धं हृषीकेश रक्षतां सर्वतो दिशः ॥ अथासनम् ॥ अपसव्येन मोटकमादाय, ॐ अद्यामुकगोत्रस्याऽस्मत्पितुरमुकशर्मणः वसुस्वरूपस्याद्य कर्तव्यसांवत्सरिकैकोद्दिष्टश्राद्धे इदं मोटकरूपमासनं ते स्वधा इति ब्राह्मणाय मोटकरूपमासनं दद्यात् । 'ॐ हस्तार्घपात्रमहं करिष्ये'

१. नीवीनामधेया ग्रन्थिः सर्वेषां दक्षिणकट्यां भवति न तु वामे, अतस्तत्रैवेदं मोटकं धारयेत् । श्राद्धकारिकाकारोऽप्येवमेवाह ।

इति पृच्छेत्—'ॐ कुरुष्व' इत्यनुज्ञातः सन् पुटकमकमग्रे कृत्वा, तत्र ॐ पवित्रेस्थ इति मन्त्रेण दक्षिणाग्रं पवित्रं क्षिपेत्। ॐ शन्नोदेवीरिति मन्त्रेण जलं क्षिपेत्। तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः। प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान् प्रीणाहि नः स्वाहा॥ इति मन्त्रेण तिलान् क्षिपेत्। ॐ श्रीश्चते इति पुष्पम्। ॐ गन्धद्वारामिति गन्धम्। 'ॐ हस्तार्घपात्रं सम्पन्नम्' इति 'ब्राह्मणं पृच्छेत्' 'ॐ सुसंपन्नम्' इतितेनोक्ते, 'ॐ हस्तार्घँपात्रम् उत्थापयामि' 'ॐ उत्थापयस्व' इत्यनुज्ञातः हस्तार्घपात्रं वामहस्ते कृत्वा-'ॐ नमो नारायणाय' इति मन्त्रेण पुष्पसहितं दक्षिणाग्रं पवित्रम् उत्तानस्वदक्षिणहस्तेन विप्रकरे धृत्वा वामहस्तस्थं हस्तार्घपात्रमुत्तानदक्षिणकरेणापिधाय, ॐ या दिव्या आपः पयसा संबभूवुर्याऽअन्तरिक्षाऽ उत पार्थवीर्याः। हिरण्यवर्णा यज्ञियास्तानऽआपः शिवाः शꣳ स्योना सुहवा भवन्तु। इति

मन्त्रेणार्घपात्रस्थजलमभिमन्त्र्य जलतिलमोटकमादाय—ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन् वसुस्वरूपाद्यसांवत्सरिकैकोद्दिष्टश्राद्धे एष हस्तार्घस्ते स्वधा इति ब्राह्मणकरे अर्घ्यं दद्यात्। अर्घे पुनः प्रत्यर्घमस्तु इति सपुष्पं पवित्रं प्रत्यानीय पुष्प-पवित्रसहितं तदर्घपात्रं भूमौ धृत्वा सव्यं कृत्वा तत्रस्थजलेन ॐ तच्चक्षुरिति मन्त्रेण चक्षुःस्पर्शः कर्तव्यः॥ ततोऽपसव्येनार्घपात्रं गृहीत्वा ब्राह्मणस्य वामपार्श्वे 'पित्रे स्थानमसीति' न्युब्जं कुर्यात्। तदुपरि कुशत्रयं दद्यात्। ततः 'ॐ अर्चयिष्ये' इति ब्राह्मणं पृच्छेत्। 'ॐ अर्चय' इत्युक्ते जलचन्दन-पुष्पाक्षतताम्बूलयज्ञोपवीतवस्त्रद्रव्यादिभिः समभ्यर्च्य धूपदीपौ च कारयेत्। मोटकादिकमादाय—'ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन् वसुस्वरूपाद्य-सांवत्सरिकैकोद्दिष्टश्राद्धे एतान्यर्चनानि अत्र गन्धपुष्पाक्षतताम्बूलयज्ञो-पवीतधूपदीपद्रव्यवासांसि ते स्वधा 'ॐ अर्चनविधेः सर्वं परिपूर्णमस्तु इति

विप्रकरे जलं दद्यात्। 'ॐ अस्तु' इति प्रतिवचनम्। ततः सव्येनाऽऽचम्य, अपसव्येन ॐ यथा चक्रायुधो विष्णुस्त्रैलोक्यं परिरक्षति। एवं मण्डल-[१]भस्मैतत्सर्वभूतानि रक्षतु। इति मन्त्रेण वामावर्तेन चतुष्कोणमण्डलं विधाय, तिलघृतमधुजलयुतमन्नं मोटकादिसहितमादाय दक्षिणाभिमुखो भूत्वा, 'ॐ इदमन्नं सजलमेतद्भूस्वामिपितृभ्यो नमः' इत्युत्सृजेत्॥ अथाऽन्नसङ्कल्पः॥ सोपस्करं जलयुतमन्नमुपनीय मधुनाभिघार्य अधोमुखाभ्यां व्यस्ताभ्यां पाणिभ्यामन्नपात्रमालभ्य, ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽअमृतेऽअमृतं जुहोमि स्वाहा इत्यालभ्य ॐ इदं विष्णुरित्यादि सुरेन्तम्। ॐ विष्णो कव्यमिदं रक्ष मदीयम् इति च पठित्वा विप्रदक्षिणाङ्गुष्ठं गृहीत्वा, ॐ इदमन्नम् इत्यन्ने, ॐ इमा आप इति जले, ॐ

१. अत्र भस्मपद सत्वेऽपि जलेन मण्डलं कुर्वन्ति कन्त्रं विनैवेदं पठन्ति धान्यमसंतोतीव॥

इदमाज्यम् इति घृते, ॐ इदं हविः इति पुनरन्ने, एतान्युपकरणानीति क्रमेणान्नजलघृतादिषु विप्रदक्षिणाङ्गुष्ठं निवेश्य, ॐ अपहताऽअसुरा रक्षा ꣳसि व्वेदिषदः इति पठित्वा वामावर्तेन श्राद्धदेशे तिलान् विकीर्य मोटकादीन्यादाय वामहस्ताङ्गुष्ठाङ्गुलिभिः क्रमेणान्नमपश्च स्पृष्ट्वा, ॐ अद्यामुकगोत्रायाऽस्मत्पित्रे अमुकशर्मणे वसुस्वरूपायाद्यसांवत्सरिकैकोद्दिष्टश्राद्धे इदमन्नं सजलं सोपस्करं परिविष्टं परिवेक्ष्यमाणाम् अक्षय्यतृप्तिहेतोस्ते स्वधा इति भूमावेव* मोटकादिकमुत्सृजेत् ॥ ॐ अन्नसङ्कल्पसिद्धिरस्तु इति भवान् प्राशयतु इति च विप्रकरे जलं दद्यात् ॥ ततः श्राद्धकर्ता कुशोपरि विशन् सव्येन सव्याहृतिकां गायत्रीं जपित्वा मधुव्वाता ऋतायते इति ऋचं पठेत्। ॐ मधु ३। अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत्।

---

* श्राद्धीयान्नस्य सङ्कल्पो भूमावेव प्रदीयते। हस्तेषु दीयमानं तु पितॄणां नोपतिष्ठते, इति धर्मप्रदीपे।

तत् सर्वमच्छिद्रमस्तु भास्करस्य प्रसादतः ॥ ॐ नमस्तुभ्यं विरूपाक्ष नमस्तेऽनेकचक्षुषे ॥ नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ॥ इति पठित्वा यथासुखं जुषस्व इति वचनानन्तरं पितृसूक्तं[१] च पठेत्। ततोऽन्नपात्र-सन्निधौ गत्वाऽऽस्तृतदक्षिणाग्रकुशत्रयायां भूमौ विकरासनं दद्यात्। अप-सव्येन मोटकादिकमादाय--असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम् ॥ उच्छिष्टभागधेयानां दर्भेषु विकरासनम् ॥ इति मोटकरूपमासनमास्तृत-कुशोपरि उत्सृजेत्। समधुतिलघृतयुतमन्नमादाय जलेनाप्लाव्य मोटकादिकं चादाय, अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम ॥ भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम् ॥ इति मन्त्रेणास्तृतकुशोपरि तदन्नं विकिरेत्। अत्रोङ्काररहितः कार्यः, ततः कुशान् परित्यज्य, सव्येन हस्तौ

१. ॐ अग्नये कव्यवाहनाय षट् ६, ॐ तदेव १६, ॐ कृणुष्वपाज इति पञ्च ५, ॐ सुरावन्तमित्यादि अपां फेनेमेत्यन्तं ३६, ॐ सहस्रशीर्षेति १६, ॐ नमस्ते इति ६६ [१४८]

पादौ प्रक्षाल्य, द्विराचम्य, हरिं स्मरेत् । ततो ब्राह्मणं तृप्तं ज्ञात्वा, अपसव्येन 'ॐ जलगण्डूषमिदं ते' इति ब्राह्मणाय प्रत्यपोशानं दद्यात्। अत्र [1]वाग्विसर्गः सर्वेषाम् । ततः सव्येन सप्रणवव्याहृतिपूर्वां गायत्रीं जपित्वा ॐ मधुव्वातेति ऋचम् ॐ मधु ३ इति च जपेत् । ततोऽपसव्येनाञ्जलिं बद्ध्वा ब्राह्मणं पृच्छेत् । ॐ स्वदितम् ? ॐ सुस्वादितम् इति प्रतिवचनम्। शेषमन्नं किम् क्रियताम् ? ॐ इष्टैः सह भुज्यताम् इति प्रतिवचनम् । पिण्डदानमहं करिष्ये, ॐ कुरुष्व इति अनुज्ञातः सन् पिण्डदानार्थं हस्तमितां चतुरङ्गुलोच्छ्रितां सैकतादिकां दक्षिणप्लवां पिण्डिकां निर्माय तदुपरि पिण्डिकामध्ये वामेन पाणिना दर्भपिञ्जुलीं गृहीत्वा दक्षिणहस्ते कृत्वा सव्योपगृहीतदक्षिणपाणिना. ॐ अपहताऽअसुरा रक्षा ᳪ सि व्वे-

---

१. श्राद्धभोजने । मौनिता तस्या अयं परित्यागः ।

द्दिषदः इति मन्त्रेण दक्षिणाग्रां रेखां कृत्वा दर्भपिञ्जुलीमुत्तरस्यां क्षिपेत् । ॐ ये रूपाणीति मन्त्रेणाङ्गारं भ्रामयित्वा दक्षिणस्यां क्षिपेत्--ॐ ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति । परापुरोनिपुरो ये भरन्त्यग्निष्टाँल्लोकान्प्रणुदात्यस्मात् ॥ ततो जलेन शन्नोदेवीरिति मन्त्रेण पिण्डकासेचनम् । तदनुछिन्नमूलकुशान् दक्षिणाग्रान् पिण्डिकायां दद्यात् । ततः सव्येन, ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ॥ नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥ इति त्रिः पठेत् ॥ अपसव्यं विधाय एकं पुटकं वामहस्ते कृत्वा मोटकादिकमादाय, ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन् वसुस्वरूपाद्यसांवत्सरिकैकोद्दिष्टश्राद्धे पिण्डस्थानेऽत्रावने निक्ष्व ते स्वधा इति अवनेजनं दद्यात् । मोटकादीनि पिण्डं*

---

*पत्नीहस्ताच्च संगृह्य पिण्डदानं करोति यः । शतसंवत्सरो तृप्तिः पितॄणां भवति ध्रुवम् ।
[illegible] पिण्डं वर्तलयेत् संकल्पयेच्च ।

पिण्डं वर्तलयेत संकल्पयेच्च ।

चादाय वामहस्ते पुटकादिस्थजलमादाय--ॐ अद्यामुकगोत्रास्मत्पितरमुक-शर्मन् वसुस्वरूपाद्यसांवत्सरिकैकोद्दिष्टश्राद्धे एष पिण्डोऽमृतस्वरूपोऽक्षय्य तृप्तिहेतोस्ते स्वधा इति अवनेजनोपरि पिण्डं दद्यात् । अत्र लेपभागनिषेधः, करं प्रोक्ष्य कुशान् परित्यज्य, सव्येन द्विराचम्य हरिं स्मरेत् । ततः सव्येनैव गन्धपुष्पादीन्यादाय पितरमुद्दिश्य—ॐ अत्र पितरो मादयध्वं यथाभागमावृषायध्वम् इति मन्त्रं पठित्वा वामावर्तेन वेद्या दक्षिणतो गत्वा उत्तराभिमुखो भूत्वा श्वासं नियम्य भास्करमूर्तिं पितरं ध्यायन् अपसव्यं कृत्वा दक्षिणावर्तेन उत्तरतो गत्वा दक्षिणाभिमुखो भूत्वा, ॐ अमीमदन्त पितरो यथाभागमावृषायिषत, इति मन्त्रेण गन्धपुष्पादीनि पिण्डोपरि क्षिपेत् । ततोऽवनेजनपात्रं वामहस्ते कृत्वा मोटकादिकमादाय--ॐ अद्या-मुकगोत्रास्मत्पितरमुकशर्मन् वसुस्वरूपाद्यसांवत्सरिकैकोद्दिष्टश्राद्धे

इदं पिण्डप्रत्यवनेजनं ते स्वधा इति पिण्डे प्रत्यवनेजनं दद्यात्। ततो नीवीं विस्रंस्य मोटकं भूमौ निधाय सव्यं कृत्वाऽऽचम्य हरिं स्मरेत्। अपसव्यं कृत्वा 'नमो वः पितरो रसाय' इति वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय—ॐ नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरो देष्मैतद्वः पितरो वास आधत्त ॥ इति मन्त्रेण पिण्डोपरि सूत्रं दद्यात्। ततः पिण्ड गन्धादिभिः संपूज्य धूपदीपौ च कारयेत्। मोटकादिकमादाय ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन् वसुस्वरूपाद्यसांवत्सरिकैकोद्दिष्टश्राद्धे एतानि पिण्डार्चनानि अत्र द्रव्यसूत्रगन्धपुष्पाक्षतधूपदीपैक्षवादि नैवेद्य-ताम्बूलयज्ञोपवीतादीनि ते स्वधा इति गन्धादिकमुत्सृजेत् ॥ ततो विप्रकरे ... ॐ सौमनस्यमस्तु इति पुष्पम्

ॐ अक्षतं चारिष्टमस्तु इति तण्डुलान् दद्यात्। ततः सव्येन पूर्वाभिमुखो भूत्वा वक्ष्यमाणमन्त्रान् पठेत्। ॐ अपां मध्ये स्थिता देवा सर्वमप्सु प्रतिष्ठितम् ॥ ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवन्तु मे ॥ १ ॥ लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे ॥ लक्ष्मीर्वसति गोष्ठेषु सौमनस्यं ददातु मे ॥ २ ॥ अक्षतं चाऽस्तु मे पुण्यं शान्तिः पुष्टिर्धृतिस्तथा ॥ यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम ॥ ततः कर्मपात्रोदकं कुशैर्गृहीत्वा प्रतिमन्त्रां स्वशिरस्यभिषिञ्चेत्। ॐ अस्मत्कुले दीर्घमायुरस्तु, ॐ शान्तिरस्तु, ॐ पुष्टिरस्तु, ॐ वृद्धिरस्तु, ॐ यच्छ्रेयस्तदस्तु, ॐ यत्पापं तत्प्रतिहतमस्तु इति भूमौ, ॐ द्विपदेचतुष्पदेभ्यः शान्तिर्भवतु। ततोऽपसव्येन पिण्डशेषान्नं पिण्डसमीपे विकिरेत्। वामहस्ते पुटकादिस्थजलं कृत्वा मोटकादिकमादाय—ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणो वसुस्वरूप-

स्याद्यसांवत्सरिकैकोद्दिष्टश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठाम्, इति पिण्डेऽक्षय्योदकं दद्यात्। ततः सव्येन कृताञ्जलिर्दक्षिणां दिशमवलोकयन् 'ॐ अघोरः पिताऽस्तु' इति पिण्डोपरि पूर्वाग्रां जलधारां दद्यात्। ततः प्राङ्मुखो भूत्वाऽञ्जलिं बद्ध्वाऽऽशिषः प्रार्थयेत्। ॐ गोत्रन्नो वर्धताम्, ॐ वर्धताम्। ॐ दातारो नोऽभिवर्धन्ताम्, ॐ वर्धन्ताम्। ॐ वेदा वर्धन्ताम्, ॐ वर्धन्ताम्। ॐ सन्ततिर्वर्धताम्, ॐ वर्धताम्। ॐ श्रद्ध च नो माव्यगमत्, ॐ मागात्। ॐ बहुदेयं च नोऽस्तु, ॐ अस्तु। ॐ अन्नं च नो बहु भवेत्, ॐ भवतु। ॐ अतिथींश्च लभेमहि, ॐ लभध्वम्। ॐ याचितारश्च नः सन्तु, ॐ सन्तु। ॐ मा याचिष्म कंचन, ॐ मा याचेथाः। ॐ एताः सत्या आशिषः सन्तु, ॐ सन्तु इति प्रति-

... ॐ एताः सत्या आशिषः सन्तु, ॐ सन्तु इति प्रति-

वचनम् ।। ततो ब्राह्मण[1]हस्तेन तिलकं कुर्यात् । ॐ यं कामं कामयते सोऽस्मै कामः समृध्यताम् इति मन्त्रेण । ततोऽपसव्येन सपवित्रान् कुशान्न्युब्जपात्रात्समादाय पिण्डसमीपे भूमौ निक्षिप्य, 'ॐ स्वधां वाचयिष्ये' 'ॐ वाच्यताम्' इति प्रतिवचनान्तरम् रिक्ताञ्जलिना—ॐ अद्यामुकगोत्रायास्मत्पित्रोऽमुकशर्मणे वसुस्वरूपायाद्यसांवत्सरिकैकोद्दिष्टश्राद्धे स्वधोच्यताम्, ॐ अस्तु स्वधा । ततः पयसादिसहितं जल-पुटकं वामहस्ते कृत्वा ॐ ऊर्ज्जम्वहन्तीरिति मन्त्रं पठित्वा सपवित्रकुशोपरि दक्षिणाग्रां जलधारां पयोधारां[2] च दद्यात् । ॐ ऊर्ज्जम्वहन्तीरमृतं घृतम्पयः कीलालम्परिस्रुतम् ।। स्वधास्थ तर्पयत मे पितॄन् ।। ततोऽपसव्येन ॐ पिण्डः सम्पन्नः । ॐ सुसम्पन्नः । ॐ पिण्डमुत्थापयामि, ॐ उत्थापयस्व इत्यनुज्ञातः सन् सव्येन

---

१. आत्महस्तेन इति काशिका । २. सूत्रानुसारं जलधारा परम्परानुसारं पयोधारा च देया ।

एकोद्दिष्ट श्राद्ध विधी:

नम्रीभूय पिण्डमाघ्राय, अपसव्येन उत्थापयेत्[१] । पिण्डाधारकुशानुल्मुकं च वह्नौ क्षिपेत् । सव्येन पिण्डिकायां शङ्खं चक्रं च लिखेत्, ॐ शङ्खाय नमः, ॐ चक्राय नमः इति यवैः शङ्खचक्रपूजां विधाय, अपसव्यं कृत्वा, 'ॐ गयायां पितृरूपेण स्वयमेव जनार्दनः ॥ तं दृष्ट्वा पुण्डरीकाक्षमुच्यते च ऋणत्रयात् ॥ इति मन्त्रेण पिण्डं पिण्डिकोपरि निधाय, सव्येन पूजयेदेभिर्मन्त्रैः–ॐ वसन्ताय नमस्तुभ्यं ग्रीष्माय च नमो नमः ॥ वर्षाभ्यश्च शरत्संज्ञ ऋतवे च नमो नमः ॥ हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च ॥ माससंवत्सरेभ्यश्च दिवसेभ्यो नमो नमः ॥ कर्पूरदीपं दत्त्वा ततोऽपसव्येनार्घपात्रमुत्तानीकृत्य, सव्येन दक्षिणां दद्यात् । कुशातिलजलदक्षिणाद्रव्यमादाय, अद्येत्यादि अमुकगोत्रस्यास्मत्पितुरमुकशर्मणो वसुस्वरूपस्याद्यकृतैतत्सांव-

---

१. [illegible]नगिकारस्तु वसन्ताद्यृतुपूजान्ते पिण्डाघ्राणं कर्तव्यमित्याह ।

त्सरिकैकोद्दिष्टश्राद्धे पिण्डदानप्रतिष्ठासिद्ध्यर्थं दक्षिणां रजतं चन्द्रदैवतं तन्मूल्योपकल्पितं द्रव्यं यथानामदैवतं यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति विप्रकरे दद्यात्। पुनः कुशादिसहितं भूयसीदक्षिणाद्रव्यमादाय ॐ अद्येत्यादि अमुकगोत्रस्यास्मत्पितुरमुकशर्मणो वसुस्वरूपस्याद्यकृतैतत्सांवत्सरिकैकोद्दिष्टश्राद्धे न्यूनातिरिक्तपरिपूर्णार्थं यद्देयमन्नपानादिकं यथाद्रव्यं च यथायथानामदैवतं नानानामगोत्रेभ्यो नानानाम शर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुमहमुत्सृजे। ततोऽपसव्येन ॐ अभिरम्यताम्, ॐ अभिरम्यताः स्म इति प्रतिवचनान्ते ब्राह्मणस्य दक्षिणाङ्गुष्ठं गृहीत्वा स्थाप्य त्रिर्वारिधारया संवेष्ट्य विसर्जयेत्। ॐ आ मा वाजस्य-प्रसवो जगम्यादेमे द्यावापृथिवी विश्वरूपे॥ आ मा गन्तां पितरा मातरा चामा सोमोऽअमृतत्वेन गम्यात्। ततः सव्येन, ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च॥ नमः स्वाहायै स्वधायै नित्यमेव नमो नमः, इति त्रिः

पठेत् ॥ अपसव्येन दीपमाच्छाद्य, सव्यं कृत्वा हस्तौ पादौ प्रक्षाल्याऽऽचम्य इति पठेत् ॐ यत्कृतं तत्सुकृतमस्तु यन्नकृतं तद्विष्णोः प्रसादाद् ब्राह्मण-वचनात् सर्वं परिपूर्णमस्तु । ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च ॥ स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥ १ ॥ आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च । प्रयच्छन्तु यथा राज्यं पितरः श्राद्धतर्पिताः ॥२॥ ॐ कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतिस्वभावात् ॥ करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पये तत् ॥ ३ ॥ इति भूमौ सपवित्रं जलं त्यजेत् । ततो बद्धाञ्जलिः पठेत्–ॐ यस्य स्मृत्या च नामो-क्त्या तपोयज्ञक्रियादिषु ॥ न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्यु-तम् ॥४॥ [ॐ अच्युताय नमः ३ ।] ॐ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ॥ हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥ ५ ॥ इति ॥

अथ पार्वणश्राद्धविधि-निर्णयः

श्रीगणेशाय नमः ।। संकल्पे विभक्तिः—अक्षय्यासनयोः षष्ठी द्वितीयावाहने तथा ।। अन्नदाने चतुर्थी स्याच्छेषाः संबुद्धयः स्मृताः ।। श्राद्धकालः—आमश्राद्धं तु पूर्वाह्णे एकोद्दिष्टं च मध्यतः ।। पार्वणं चापराह्णे तु प्रातर्वृद्धिनिमित्तकम् । हारीतः ।। गृहाग्निशिशुदेवानां ब्रह्मचारितपस्विनाम् । तावन्न दीयते किञ्चिद्यावत् पिण्डान्न निर्वपेत्—हेमाद्रिः ।। पाककर्तृविचारः—रजस्वलां च पाखण्डां पुंश्चलीं पतितां तथा ।। त्यजेच्छूद्रां तथा वन्ध्यां विधवां चान्यगोत्रजाम् ।। पात्रविचारः—न कदाचित् पचेदन्नमयःस्थालीषु पैतृकम् ।। अयसो दर्शनादेव पितरो विद्रवन्ति हि ।। एवं शस्त्रा-

दीन्यपि पितृसन्निधौ न स्थापयेत् ॥ श्राद्धभूमिः—गोगजाश्वादिजुष्टेषु कृत्रिमायां तथा भुवि ॥ न कुर्याच्छ्राद्धमेतेषु पारक्यादिषु भूमिषु । भारते वर्ज्यविप्राः—कितवो ब्रह्महा यक्ष्मी पशुपालो निराकृतिः ॥ ग्रामप्रेष्यो वार्धुषिको गायकः सर्वविक्रयी ॥ पार्वणे विश्वेदेवविचारः—पुरूरवा माद्र-वाश्च पार्वणे समुदाहृतौ । (येषामेतन्न ज्ञानं तैः) आगच्छन्तु महाभागा विश्वेदेवा महाबलाः ॥ ये यत्र विहिताः श्राद्धे सावधाना भवन्तु ते ॥ इत्ययं श्लोक उच्चारणीयः ॥ सम्बन्धं प्रथमं ब्रूयाद् गोत्रं नाम तथैव च ॥ पश्चाद् रूपं विजानीयात् क्रम एष सनातनः ॥ सकारेण तु वक्तव्यं गोत्रं सर्वत्र धीमता ॥ सकारः कुतपो ज्ञेयस्तस्माद्यत्नेन तं वदेत् ॥ अन्ना-भावे द्विजाभावे यद्येको ब्राह्मणो भवेत् ॥ पात्राण्यासादयेत् त्रीणि न तु ब्राह्मणसंख्यया ॥ इति मनुः ॥ छन्दोगा जुहुयुः सव्येनापसव्येन याजुषा

पार्वणश्राद्धविधि-निर्णयः ४१

[illegible] ॥ इति मन्त्रः ॥ छन्दोगा जुहुयुः सव्येनापसव्येन याजुषा

इति वृद्धयाज्ञवल्क्योक्तेः ॥ पिण्डपितृयज्ञवद्धुत्वेति सामान्यातिदेशसत्वाच्चाऽपसव्येनैव कार्यम्, एतेन स्वाहाशब्दस्य देवकार्यप्रयुज्यमानस्य दर्शनात् सव्येनैवेति वदन्तः परास्ता होमस्य वह्निपत्नीशब्दोच्चारणेन विनाऽसंभव इति भवदुक्तस्य नरविषाणायमानत्वात् ॥ भूस्वामी—परकीयगृहे यस्तु स्वान् पितॄन् तर्पयेद्यदि ॥ तद्भुवः स्वामिनस्तस्य हरन्ति पितरो बलात् ॥ अग्रभागं ततस्तेभ्यो दद्यान्मूल्यं च जीवनमित्युक्तेः । श्राद्धार्हाणामग्रभागं शूद्राणां तु मूल्यजीवने देये । पिण्डभेदनादिविचारः—श्वशृगालखरैः स्पृष्टः पिण्डो भिन्नः प्रमादतः ॥ कर्तुरायुष्यनाशाय प्रेतस्तं नोपसर्पति ॥ तद्दोषपरिहारार्थं प्राजापत्यं प्रकल्पयेत् ॥ श्राद्धे पुष्पविचारः—केतकीं तुलसीपत्रं बिल्वपत्रं च वर्जयेत् ॥ द्रोणं च करवीरं च धत्तूरं किंशुकं तथा इति पृथ्वीचन्द्रोदयवचनात् यद्यपि तुलसी न प्राप्ता तथापि, तुलसीगन्धमाघ्राय पितरस्तुष्टमानसाः ॥ प्रयान्ति गरुडारू-

दास्तत्पदं चक्रपाणिनः—इति पारिजातवचनात् पिण्डेषु निवेदन भवति न ब्राह्मणार्चनेषु इति विशेषः ॥ श्राद्धे प्रशस्ताः--मध्याह्नं खड्गपात्रं च तथा नेपालकम्बलः ॥ रौप्यं दर्भास्तिला गावो दौहित्रश्चाष्टम स्मृतः ॥ पार्वण-श्राद्धे ऽपराह्णः कालः प्रशस्तः । एते श्राद्धे प्रशस्याः ॥ अथ पार्वणश्राद्धो-पयोगी किञ्चिल्लिख्यते ॥ भाद्रशुक्लपौर्णमास्यां प्रपितामहात् परांस्त्रीनुद्दिश्य श्राद्धे कार्यम् ॥ नान्दीमुखानां प्रत्यब्दं कन्याराशिगते रवौ । पौर्णमास्यान्तु कर्त्तव्यं वाराहवचनं तथा इति हेमाद्रिवचनात् । पौर्णमासीषु सर्वासु निषिद्धं पिण्डपातनम् ॥ वर्जयित्वा प्रौष्ठपदीं तथा दर्शस्तथैव सा—इति गार्ग्यवच-नाच्च ॥ कन्यागते सवितरि यान्यहानि तु षोडश ॥ क्रतुभिस्तानि तुल्यानि देवो नारायणोऽब्रवीदिति ब्रह्माण्डवचनात् । यः कन्यका-न्वितः पक्षः सोऽत्यन्तं पुण्यमुच्यते—इति कात्यायनवचनात् ॥ मध्ये

न्वितः पक्षः सोऽत्यन्तं पुण्यमुच्यते—इति कात्यायनवचनात् ॥ मध्य

वा यदि वाप्यन्ते यत्र कन्यां व्रजेद्रविः । स पक्षः सकलः श्रेष्ठः श्राद्ध-षोडशकं प्रति इति वृद्धमनुवचनाच्च षोडशदिनं श्राद्धकालः । पार्वणे षोडशत्वं भाद्रपूर्णिमया सहेत्येकपक्षः, आश्विनकृष्णप्रतिपदेति द्वितीयः, तिथिवृद्ध्या तृतीयः, नाद्यः पूर्णिमायां प्रपितामहात्परानुद्दिश्य नान्दी-श्राद्धविधानेन तस्य पितृश्राद्धे नाङ्गत्वं नान्त्योऽपि यत्र पक्षे द्वितिथ्योर्वृद्धि-स्तत्र सप्तदशदिनप्रसङ्गेनैकस्मिन् श्राद्धानापत्तेः, न च प्रतिपदा षोडशत्वे तिथिवृद्धौ षोडशत्वहानिः । वृद्धेस्तस्मिन्नहन्येवान्तर्भावात् । न च त-द्भवतः संभवति तिथिवृद्ध्या षोडशत्वमिति व्याघातात् । अवशिष्यते द्वितीयः पक्षः । अह्नः षोडशकं यत्तु शुक्लप्रतिपदा सहेति देवलवचनात् आषाढीमवधिं कृत्वा पञ्चमं पक्षमाश्रिताः ॥ कांक्षन्ति पितरः क्लिष्टा अन्न-मप्यन्वहं जलम् इति वृद्धमनुवचनाच्च ॥ अतएव पौर्णिमास्यां श्राद्धं न

तदङ्गमिति पूर्वोक्तमपि संगतं भवतीति दिक्[१] ॥ विधवा पार्वणं ब्राह्मणद्वारा कुर्यात् ॥ विधवा कारयेच्छ्राद्धं यथाकालमतन्द्रिता इति स्मृतिसङ्ग्रहात्स्वयं संकल्प्य, विधवा कारयेत् श्राद्धं पार्वणमिति प्रयोगपारिजातस्यार्थिक-वचनाच्च ॥ पार्वणे गौणः कालः—महालयश्राद्धस्य षोडशदिने करणसंभवे कार्तिकदर्शे कार्यम् । येयं दीपान्विता राजन् ख्याता पञ्चदशी तिथिः ॥ तस्यां दद्याददत्तं चेत् पितृभ्यो वै महालये, इति भविष्यवचनात् । तत्राप्यसंभवे वृश्चिकसंक्रान्तेः प्रागेव कर्तव्यं प्रमाणमाकरे द्रष्टव्यम् ।

● ●

१. काशिकाकारस्तु, सूत, ब्रह्माण्डपुराण, पुराणसमुच्चय. वृद्धयाज्ञवल्क्यवायुपुराण वाक्यान्युदाहृत्य पौर्णमास्या सह षोडशत्वं प्रतिपादितवान् ।

पौर्णमास्या सह षोडशत्वं प्रतिपादितवान् ।

पार्वणश्राद्धानुक्रमणिका

भूदेवस्य निमन्त्रणं द्विजवरस्यार्घस्ततः स्वागतप्रश्नश्चेति तदुत्तरं कुरु तथा सेकं प्रतिज्ञा जपः ।
दिग्बन्धासनके पितॄनथ पुनश्चावाहयेद्दैवतं हस्तार्घस्तदधोमुखं कुरु पुनः पूजा ततो मण्डलम् ॥१॥
प्रागग्नौकरणं धरापतिदतिः पात्राऽवशेषं हविस्त्वन्नानां परिवेषणं मधुजवो मध्वाज्यदानादनु ।
पात्रालम्भनमन्नदानमखिलं कृत्वान्नहीनं जपेदापोविप्रकरे कुशोपरिविशन्मध्वादिकंसंपठेत् ॥२॥
दानं वैकिरकं द्विराचमनता सावित्रिमन्त्रो मधुत्दापो विप्रकरेषु पिण्डकरणे प्रश्नस्तथैवोत्तरम् ।
वेद्यङ्गारकशोधनं खलु तथा रेखावसेकस्ततो दर्भाणां प्रकरं प्रसार्य च तथा सव्येन देवं जपेत् ॥३॥
पिण्डस्यासनतोऽथ पिण्डवपनं हस्तस्य संप्रोक्षणं प्राग्वच्चाचमनं विचिन्त्य च पितॄन् पिण्डावनेजो जलैः ।
नीव्या मोचनतोऽथसव्यभवनं कुर्याद्धरेः संस्मृतिं सूत्रा र्चक्षततोऽथचान्नवपनादक्षय्यदानं ततः ॥४॥
सव्याऽघोरदती वरार्थिभवनं कुर्य्यात्स्वधावाचनं चोर्जं पिण्डकुशोल्मुकामलकृतिःपात्रोत्थितिर्दक्षिणाम्
विप्राणां च विसर्जनं सुरजपो दीपः कराच्छादितः कुर्य्यादाचमनं प्रमादपठनं श्राद्धस्य पूर्णः क्रमः ॥५॥

अथ पार्वणश्राद्धविधिः

कर्ता शुचिराचान्तः गोमयोपलिप्ते प्राङ्गणे दीपं प्रज्वाल्याऽऽचम्य प्रत्यङ्मुखः प्रथमं विश्वेदेवब्राह्मणौ निमन्त्रयेत्। स्ववामपाणिना विप्रदक्षिणजानु स्पृष्ट्वा स्वदक्षिणजानु च पातयित्वा स्वदक्षिणहस्तेनाधोमुखेन ताम्बूलादिकं विप्रहस्ते दत्त्वा ॐ अद्येत्यादि[१] अमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिनां विश्वेषां देवानां पुरूरवोमाद्रवोनाम्नामद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे अनेन ताम्बूलगन्धपुष्पाक्षतेन त्वं मया निमन्त्रितः।

१—पूर्वोक्तश्लोकानुसारं प्रथमं संबन्धमुच्चार्य क्रमशो गोत्रनामरूपादिकमुच्चरेदिति केचित्।

ॐ निमन्त्रितोऽस्मि इति प्रतिवचनम् । पुनस्तत्सर्वं पूर्ववद् विधाय ॐ अद्येत्यादि अमुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां श्राद्धसंबन्धिनां विश्वेषां देवानां पुरूरवोमाद्रवोनाम्नामद्यकर्त्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धेऽनेन ताम्बूलगन्धपुष्पाक्षतेन त्वं मया निमन्त्रितः ॐ निमन्त्रितोऽस्मि इति प्रतिवचनम् । ततोऽपसव्यं कृत्वा दक्षिणाभिमुखो भूत्वा स्ववामजानु पातयित्वा वामहस्तेन उदङ्मुखस्य पितृब्राह्मणस्य वाम* जानु स्पृष्ट्वा उत्तानेन स्वदक्षिणकरेण ताम्बूलादिकं विप्रहस्ते दत्त्वा ॐ अद्येत्यादि अमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणाम् अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वण-

---

* देवार्चादक्षिणादिः स्यात् पादजान्वंशमूर्धसु, शिरोंशजानु पादेषु वामाजादिषु पैतृके ।--धर्मसिन्धुः

श्राद्धे अनेन ताम्बूलगन्धपुष्पाक्षतेन त्वं मया निमन्त्रितः ॥ ॐ निमन्त्रितोऽस्मि इति प्रतिवचनम् । पुनः पूर्ववत् ॐ अद्येत्यादि अमुकगोत्राणामस्मन्मातामह-प्रमातामह-वृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे अनेन ताम्बूलगन्धपुष्पाक्षतेन त्वं मया निमन्त्रितः । ॐ निमन्त्रितोऽस्मि इति प्रतिवचनम् । ॐ अक्रोधनैः शौचपरैः सततं ब्रह्मवादिभिः ॥ भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा ॥१॥ सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः । भवितव्यं भवद्भिर्नोऽद्यतने श्राद्धकर्मणि ॥२॥ ॐ भवितव्यम् इति प्रतिवचनम् । ततः सव्येन विश्वेदेवब्राह्मणयोश्चरणान् प्रक्षालयेत् । ॐ नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ॥ सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥ ॐ नमो ब्रह्मण्यदेवाय

गोब्राह्मणहिताय च ॥ जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥
पाद्यपात्रं वामहस्ते कृत्वा शन्नोदेवीरिति मन्त्रं पठित्वा कुशादिकमादाय
ॐ अद्याऽमुकगोत्राणामस्मत्पितृ-पितामह-प्रपितामहानाममुकामुकामुकश-
र्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामद्यकर्तव्यमहालयापरपक्षान्त-
र्गतपार्वणश्राद्धे श्राद्धसम्बन्धिनो विश्वेदेवाः पुरूरवो माद्रवो नामानः एष
पादार्घो वः स्वाहा। पुनः पूर्ववत् कृत्वा कुशादिकमादाय ॐ अद्याऽ-
मुकगोत्राणामस्मन्मातामह-प्रमातामह-वृद्धप्रमातामहानाममुकामुकामुकश-
र्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामद्यकर्तव्यमहालयापरपक्षान्त-
र्गतपार्वणश्राद्धे श्राद्धसम्बन्धिनो विश्वेदेवाः पुरूरवोमाद्रवो नामानः एष
पादार्घो वः स्वाहा। ततोऽपसव्येन पितृब्राह्मणयोश्चरणान् प्रक्षालयेत्
ॐ नमोऽस्त्वनन्ताय इति। यत्फलं कपिलादाने कार्तिक्यां ज्येष्ठपुष्करे।

तत्फलं पाण्डवश्रेष्ठ ! विप्राणां पादशौचने, इति ।। पाद्यपात्रं वामहस्ते कृत्वा शन्नो देवीरिति मन्त्रं पठित्वा मोटकमादाय ॐ अद्याऽमुकगोत्राः अस्मत्पितृपितामहप्रपितामहाः अमुकाऽमुकाऽमुकशर्माणः सपत्नीकाः वसुरुद्रादित्यस्वरूपाः अद्य कर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे एष पादार्घस्त्रेधा विभज्य युष्मभ्यं स्वधा । पुनः पूर्ववत् कृत्वा मोटकमादाय ॐ अद्यामुकगोत्राः अस्मन्मातामहप्रमातामहवृद्धप्रमातामहः अमुकामुकामुकशर्माणः सपत्नीकाः वसुरुद्रादित्यस्वरूपाः अद्य कर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे एष पादार्घस्त्रेधा विभज्य युष्मभ्यं स्वधा । ततः सव्येनाचम्य विश्वदेवब्राह्मणौ गृहं प्रवेशयेत् । ॐ आगता यूयम्, ॐ सुस्वागता वयम् । ॐ इदमासनमास्यताम्, ॐ आसे इति प्रतिवचनम् । ॐ भूर्भुवः स्वः इति मन्त्रेण विश्वदेवब्राह्मणौ पूर्वाभिमुखौ

... भूर्भुवः स्वः इति मन्त्रेण विश्वेदेवब्राह्मणौ पूर्वाभिमुखौ

उपवेशयेत् ॥ ततोऽपसव्येन ॐ आगता यूयम्, ॐ सुस्वागता वयम्। ॐ इदमासनमास्यताम्, ॐ आसे इति प्रतिवचनम्। ॐ भूर्भुवः स्वः इति मन्त्रेण पितृब्राह्मणौ उदङ्मुखौ उपवेशयेत्। सर्वत्र प्रश्नेषु पंक्तिमूर्धन्यं पृच्छेत्। ततः सव्येन ॐ कर्मपात्रमहं करिष्ये ॐ कुरुष्व इत्यनुज्ञातः सन्, ॐ यद्देवा देवहेडनम् इति मन्त्रत्रयेण देवकर्मपात्रं कुर्यात्–ॐ यद्देवा देवहेडनं देवासश्च कृमा व्वयम्॥ अग्निर्म्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ॥ यदि दिवा यदि नक्तमेनाꣳसि च कृमा व्वयम् ॥ वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः। यदि जाग्रद्यदि स्वप्नमेनाꣳसि च कृमा व्वयम् ॥ सूर्य्योमा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ॥ पवित्रे स्थ इति मन्त्रेण पवित्रं क्षिपेत्। शन्नो देवीरिति मन्त्रेण जलम्। श्रीश्चते इति मन्त्रेण पुष्पम्। यवोसीति मन्त्रेण यवान्। ततः अपसव्यं कृत्वा ॐ

कर्मपात्रमहं करिष्ये। ॐ कुरुष्व इत्यनुज्ञातः सन्। ॐ यद्देवा देवहेडनम् इति मन्त्रत्रयेण पितृकर्मपात्रं कुर्यात्। पवित्रेस्थ इति मन्त्रेण पवित्राणि क्षिपेत्॥ शन्नो देवीरिति जलम्। तिलोसीति मन्त्रेण तिलान्। श्रीश्चते इति मन्त्रेण पुष्पम्। गन्धद्वारामिति गन्धम्॥ ततः सव्येन कुशत्रयसहितं कर्मपात्रोदकमादाय। ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा। यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥ ॐ पुण्डरीकाक्षः पुनातु इत्युक्त्वा श्राद्धदेशे द्रव्याण्यात्मानं च सिञ्चेत्। तत्कुशादिकमादाय ॐ अद्येत्यादि अमुकगोत्राणामस्मत्पितृ-पितामह-प्रपितामहानाममुकामुका-मुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां तथामुकगोत्राणामस्म-न्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां

महालयापरपक्षान्तर्गतपार्वणश्राद्धमेभिर्द्रव्यैरहं करिष्ये इति प्रतिज्ञां कुर्यात् । ततः ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ॥ नमः स्वाहायै स्वधायै नित्यमेव नमो नमः, इति त्रिः पठित्वा । ॐ सप्त व्याधा दशार्णेषु मृगाः कालञ्जरे गिरौ ॥ चक्रवाकाः सरद्वीपे हंसाः सरसि मानसे ॥१॥ तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः । प्रस्थिता दीर्घमध्वानं यूयं किमवसीदथ ॥२॥ ये विप्रमुख्याः कुरुजाङ्गलेषु जातास्तथा दासकुले मृगाश्च ॥ कालञ्जरे सप्त च चक्रवाका ये मानसे ते वयमत्र सिद्धाः ॥३॥ पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः ॥ यत्र यत्र स्मरेद् विद्वान् पितॄणां दत्तमक्षयम् ॥४॥ श्राद्धभूमौ गयां ध्यात्वा तथा देवं गदाधरम् । उभाभ्यां च नमस्कृत्य ततः श्राद्धं समारभेत् ॥५॥ गयागयो गयादित्यो गायत्री च गदाधरः । गया गयासुरश्चैव षड्गया मुक्तिदायकाः ॥६॥ ईशान-

विष्णुकमलासनकार्तिकेयवह्नित्रयार्करजनीशगणेश्वराणाम् ॥ क्रौञ्चामरेन्द्र-कलशोद्भवकश्यपानां पादान्नमामि सततं पितृमुक्तिहेतोः ॥ ॐ गयायै नमः, ॐ गदाधराय नमः इति च पठेत् ॥७॥ ततोऽपसव्येन दिग्बन्धनं कुर्यात्। तिलसहितमोटकमादाय तिलान् पूर्वादिक्रमेण वक्ष्यमाणमन्त्रैर्वि-किरेत्। ॐ अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम्। अपहताऽ असुरा रक्षाᳬसि व्वेदिषदः। ॐ तथा बर्हिषदः पान्तु याम्यां ये पितरः स्थिताः। अपहताऽअसुरा रक्षाᳬसि व्वेदिषदः। ॐ प्रतीचीमाज्यपा-स्तद्वत्। अपहताऽअसुरा रक्षाᳬसि व्वेदिषदः॥ उदीचीमपि सोमपाः। अपहताऽअसुरा रक्षाᳬसि व्वेदिषदः। ॐ उर्ध्वतस्त्वर्यमा रक्षेत्कव्यवाडन-लोऽप्यधः। रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः॥ सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ॥ ततः—निवीति सर्वं [illegible]

सुरदानवा मया । रक्षांसि यक्षाः सपिशाचगुह्यका हता मया यातुधानाश्च सर्वे । इति मोटकं कट्यां[१] धारयेत् । तिलसहितकुशखण्डत्रयं गृहीत्वा-ॐ प्रयान्तु दूरतः सर्वे दैत्येया दानवास्तथा । सर्वविघ्नोपशान्त्यर्थं क्षिपामि च कुशान् तिलान् ॥ इति दक्षिणस्यां क्षिपेत् । ततः सव्येन ॥ ॐ नमो नमस्ते गोविन्द पुराणपुरुषोत्तम । इदं श्राद्धं हृषीकेश रक्षतां सर्वतो दिशः, इति रक्षार्थं विष्णुस्मरणम् । अथासनम् । सव्येनैव कुशमादाय ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिनां विश्वेषां देवानां पुरूरवोमाद्रवोनाम्नामिदं कौशमासनं वः स्वाहा । पुनः कुशमादाय

१. पिण्डब्राह्मणभाष्यकारोऽपि 'अथ नीवीमुद्धृत्य नमस्करोति' इति कण्डिका-व्याख्याने नाभेर्दक्षिणत एव नीवीस्थानमित्यमंस्त इति काशिकाकारः ।

ॐ अद्यामुकगोत्राणामस्मन्मातामह-प्रमातामह-वृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिनां विश्वेषां देवानां पुरूरवोमाद्रवोनाम्नामिदं कौशमासनं वः स्वाहा इति देवब्राह्मणाय कुशरूपमासनं दद्यात्। ततोऽपसव्यं कृत्वा मोटकमादाय। ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे इदं मोटकरूपमासनं त्रेधा विभज्य युष्मभ्यं स्वधा। पुनर्मोटकमादाय ॐ अद्यामुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे इदं मोटकरूपमासनं त्रेधा विभज्य युष्मभ्यं स्वधा। ततः सव्येन अञ्जलिं बद्ध्वा विश्वान्देवानावाहयेत्। ॐ अद्यामुक-

सव्येन अञ्जलिं बद्ध्वा विश्वान्देवानावाहयेत् । ॐ अद्यामुक-

गोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां तथा अमुकगोत्राणामस्मन्मातामहप्रमातामहवृद्ध-प्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणा-मद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे श्राद्धसम्बन्धिनो विश्वान् देवान् पुरूरवो माद्रवो नाम्नः आवाहयिष्ये, ॐ आवाहय इति प्रतिवचनम् ॥ ॐ विश्वेदेवासऽआगत शृणुतामऽइमर्ठ० हवम् । एदं बर्हिर्निषीदत, इति मन्त्रेणाऽऽवाह्य ॐ यवोसि यवयास्मद्द्वेषो यवयारातीः, इति मन्त्रेण श्राद्ध-देशे यवान् विकीर्य ॐ विश्वेदेवाः शृणुतेमर्ठ० हवम्मे येऽअन्तरिक्षे य उपद्यविष्ठ । येऽअग्निजिह्वा उत वा यजत्रा आसद्यास्मिन्बर्हिषिमादयध्वम् । इति मन्त्रं पठित्वा 'ॐ आगच्छन्तु महाभागा विश्वेदेवाः महाबलाः । ये अत्र विहिताः श्राद्धे सावधाना भवन्तु ते' इति पठेत् । ततोऽपसव्येनाञ्जलिं

बध्वा[१] पितॄनावाहययेत्॥ ॐ अद्यामुकगोत्रानस्मत्पितृपितामहप्रपितामहान् अमुकामुकाऽमुकशर्मणः सपत्नीकान् वसुरुद्रादित्यस्वरूपान् तथाऽमुकगोत्रानस्मन्मातामह-प्रमातामह-वृद्धप्रमातामहान् अमुकामुकामुकशर्मणः सपत्नीकान् वसुरुद्रादित्यस्वरूपान् अद्य कर्तव्यमहालयापरपक्षान्तर्गतपार्वण श्राद्धे आवाहयिष्ये ॐ आवाहय इति प्रतिवचनम्। ॐ उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि। उशन्नुशतऽआवह पितॄन्हविषेऽअत्तवे, इति मन्त्रेणावाह्य ॐ अपहताऽअसुरा रक्षाᳬसि व्वेदिषदः इति मन्त्रेण श्राद्धदेशे तिलान् विकीर्य। ॐ आयन्तु नः पितरः सोम्यासोग्निष्वात्ताः पथिभिर्देवयानैः। अस्मिन् यज्ञे स्वधया मदन्तोधिब्रुवन्तु ते वन्त्वस्मान्

१. [illegible] वा ।

इति मन्त्रं पठेत्। ततः सव्येन[१] विश्वेदेव-ब्राह्मणौ पृच्छेत्। ॐ हस्तार्घपात्रम् अहं करिष्ये। ॐ कुरुष्व इत्यनुज्ञातः सन् पुटकद्वयमग्रे कृत्वा ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्व्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। इति मन्त्रेण पूर्वाग्रं पवित्रद्वयं पुटकद्वये धारयेत्। ॐ शन्नो देवीरिति मन्त्रेण पुटकद्वये जलं क्षिपेत्। ॐ यवोसि० इति मन्त्रेण यवान् क्षिपेत्। ॐ श्रीश्चते लक्ष्मीरिति मन्त्रेण पुष्पाणि क्षिपेत्। ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् इति मन्त्रेण गन्धं क्षिपेत्। ॐ हस्तार्घपात्रं संपन्नम् इति देवब्राह्मणं पृच्छेत्। ॐ सुसंपन्नम् इति तेनोक्ते ॐ हस्तार्घपात्रम् उत्थापयामि, ॐ उत्थापयस्व इति वचनानन्तरम् हस्तार्घपात्रं वामहस्ते कृत्वा—ॐ नमो नारायणाय इति मन्त्रेण

१. काण्डानुसरणेन देवार्घपात्रविधिं समाप्य पित्रर्घपात्रविधिरनुष्ठेय इति वाजसनेयिनां व्यवस्थितो विकल्प इति स्पष्टं मीमांसकानाम्।

पुष्पसहितं पूर्वाग्रं पवित्रं विप्रकरे धृत्वा। अधोमुखेन दक्षिणकरेण वामकर-स्थपुटकमुखं पिधाय–ॐ या दिव्या आपः पयसा सम्बभूवुर्याऽअन्तरिक्षा उत पार्थिवीर्याः। हिरण्यवर्णा यज्ञियास्तानऽआपः शिवा सꣳ स्योना सुहवा भवन्तु॥ इति मन्त्रेणार्घपात्रस्थजलमभिमन्त्र्य कुशयवजलान्यादाय ॐअद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्व-णश्राद्धे श्राद्धसम्बन्धिनो विश्वेदेवाः पुरूरवो माद्रवो नामानः एष हस्तार्घो वः स्वाहा॥ इति देवब्राह्मणकरे अर्घं दद्यात्। अर्घे पुनः प्रत्यर्घमस्तु इति सपुष्पं पवित्रमर्घपात्रे प्रत्यानीय पवित्रसहितं तदर्घपात्रं भूमौ धृत्वा अपरार्घपात्रं वामहस्ते कृत्वा, सर्वं पूर्ववदेव विधाय यवजलकुशानादाय ॐअद्यामुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुका-

मुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामद्यकर्तव्यमहालया-
परपक्षान्तर्गतपार्वणश्राद्धे श्राद्धसम्बन्धिनो विश्वेदेवाः पुरूरवो माद्रवो
नामानः एष हस्तार्घो वः स्वाहा इति देवब्राह्मणकरे अर्घं दद्यात् । अर्घे पुनः
प्रत्यर्घमस्तु, इति पूर्ववत्कृत्वा तदर्घपात्रमपि भूमौ धृत्वा ततः अर्घपात्रद्वयस्थ-
जलेन–ॐ तच्चक्षुरिति मन्त्रेण चक्षुः स्पर्शः कार्यः । तदनन्तरं पवित्रसहिते
देवार्घपात्रे 'ॐ विश्वेभ्यो देवेभ्यः स्थानमसि' इतिवाक्येन स्वस्वविश्वेदेवदक्षि-
णपार्श्वे उत्ताने स्थापयेत् । ततोऽपसव्येन 'हस्तार्घपात्राण्यहं करिष्ये' इति
पितृब्राह्मणं पृच्छेत् । ॐ 'कुरुष्व-'त्यनुज्ञातः सन् पित्रादिमातामहाद्यर्घपात्रार्थं
स्वाग्रमेकमेकं पुटकं संस्थाप्य तयोः पुटकयोर्दक्षिणे द्वौ द्वौ पुटकौ निधाय
तेषु पुटकेषु षट्सु 'ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छि-
द्रेण पवित्रेण सूर्य्यस्य रश्मिभिः' इति मन्त्रेण उत्तराग्राणि पवित्राणि

धारयेत्। ॐ शन्नोदेवीरिति मन्त्रेण तत्र जलं क्षिपेत्। ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः। प्रत्नमद्भिः पृक्तः स्वधया पितृँल्लोकान्पृणाहि नः स्वाहा इति मन्त्रेण तिलान् क्षिपेत्। ॐ श्रीश्चते लक्ष्मीरिति मन्त्रेण पुष्पाणि क्षिपेत्। ॐ गन्धद्वारामिति मन्त्रेण चन्दनं क्षिपेत्। 'ॐ हस्तार्घपात्राणि संपन्नानि' इति पितृब्राह्मणं पृच्छेत्। ॐ हस्तार्घपात्राणि सुसंपन्नानि इति तेनोक्ते ॐ हस्तार्घपात्रमुत्थापयामि ॐ उत्थापयस्व इति वचनानन्तरम् प्रथमं पित्र्यर्घपात्रं वामहस्ते कृत्वा—ॐ नमो नारायणाय इति मन्त्रेण सपुष्पं पवित्रं पितृतीर्थेन विप्रकरे धृत्वा वामकरस्थहस्तार्घपात्रमुखमुत्तानदक्षिणकरेण पिधाय। ॐ या दिव्या आपः पयसा सम्बभूवुर्याऽअन्तरिक्षा उत पार्थिवीर्याः। हिरण्यवर्णा यज्ञियास्तानऽआपः शिवाः सꣳस्योना सहवा भवन्त॥ इति मन्त्रेणार्घपात्रस्थजलमभिमन्त्र्य तिलजलमोदक

मादाय ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन्सपत्नीकवसुस्वरूपाद्यकर्तव्य महालयापरपक्षान्तर्गतपार्वणश्राद्धे एष हस्तार्घस्ते स्वधा, इति ब्राह्मणकरे दद्यात्। ॐ अर्घं पुनः प्रत्यर्घमस्तु इति सपुष्पं पवित्रमर्घपात्रं प्रत्यानीय। पुष्पपवित्रसहितं तदर्घपात्रं भूमौ धृत्वा एवं यथाक्रमेण पितामहादिभ्यः पञ्चभ्यो दद्यात्। ततः प्रपितामहार्घपात्रस्थजलादिकं पितामहार्घपात्रे कृत्वा तत्सर्वं पित्रर्घपात्रे कृत्वा पित्रर्घपात्रमुत्तानं पितामहार्घपात्रोपरि धृत्वा तदुभयपात्रमुत्तानं प्रपितामहार्घपात्रोपरि धृत्वा एवं मातामहार्घपात्राणि अपि कृत्वा, सव्येन तत्रस्थजलेन ॐ तच्चक्षुरिति मन्त्रेण चक्षुः स्पर्शः कार्यः॥ ततोऽपसव्येन एकत्रकृतं पित्रर्घपात्रं गृहीत्वा पितृद्विजस्याऽऽसनवामभागे ॐ पितृभ्यः स्थानमसीति न्युब्जं कुर्यात्, तदुपरि कुशत्रयं दद्यात्। एवमेकत्रकृतं मातामहार्घपात्रं गृहीत्वा मातामहद्विजस्यासन-

वामभागे मातामहेभ्यः स्थानमसीति न्युब्जं कुर्यात् । तदुपरि कुशात्रयं दद्यात् । ततः सव्येन ॐ अर्चयिष्ये इति देवब्राह्मणौ ब्रूयात् 'ॐ अर्चय' इत्युक्ते गन्धपुष्पाक्षतताम्बूलयज्ञोपवीतवस्त्रादिभिः समभ्यर्च्य धूपदीपौ च[1] कारयित्वा, कुशादिकमादाय, ॐ अद्याऽमुकगोत्राणामस्मत्पितृ-पितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां अद्य-कर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे श्राद्धसम्बन्धिनो विश्वेदेवाः पुरूरवो माद्रवो नामानः एतान्यर्चनानि अत्रगन्धपुष्पाक्षतधूपदीपनैवेद्य[2]ताम्बूल यज्ञोपवीतवासांसि वः स्वाहा इत्युत्सृजेत् । पुनःकुशादिकमादाय ॐ अद्या-मुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्म-णां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामद्यकर्तव्यमहालयापरपक्षान्तर्गत-

१. अत्र सति संभवे निमन्त्रितविप्रेषु विप्रद्वयमर्चयेत् ।

२. विप्रार्चने नैवेद्यं नार्पयेत् । नैवेद्यस्थाने [illegible]

पार्वणश्राद्धे श्राद्धसम्बन्धिनो विश्वेदेवाः पुरूरवो माद्रवो नामानः एतान्यर्चनानि अत्रगन्धपुष्पाक्षतधूपदीपनैवेद्यताम्बूलयज्ञोपवीतवासांसि वः स्वाहा इत्युत्सृजेत् ।। ततोऽपसव्येन 'ॐ अर्चयिष्ये' इति पितृब्राह्मणौ पृच्छेत् ।'ॐ अर्चय' इत्युक्ते गन्धादिभिरभ्यर्च्य[१] मोटकादिकमादाय–ॐ अद्यामुकगोत्रा अस्मत्पितृपितामहप्रपितामहा अमुकामुकामुकशर्माणः सपत्नीका वसुरुद्रादित्यस्वरूपा अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे एतान्यर्चनान्यत्र गन्धपुष्पाक्षतधूपदीपनैवेद्य[२]ताम्बूलयज्ञोपवीतवासांसि त्रेधा विभज्य युष्मभ्यं स्वधा । पुनर्मोटकमादाय ॐ अद्यामुकगोत्राः अस्मन्मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकामुकशर्माणः सपत्नीका वसुरुद्रादित्य-

१. अत्रापि सति संभवे पितृवर्गार्थं त्रीन् विप्रान् मातामहवर्गार्थं च त्रीन् ब्राह्मणाँश्च पूजयेत् ।
२. अत्रापि पूर्ववद् नैवेद्यविचारः ।

स्वरूपा अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे एतान्यर्चनान्यत्र गन्धपुष्पाक्षतधूपदीपनैवेद्यताम्बूलयज्ञोपवीतवासांसि त्रेधा विभज्य युष्मभ्यं स्वधा। सव्येन विश्वेदेवब्राह्मणहस्तयोः 'ॐ अर्चनविधेः सर्वं परिपूर्णमस्तु' इति जलं दद्यात्, 'ॐ अस्तु' इति प्रतिवचनम्। अपसव्येन पितृब्राह्मणहस्तयोः ॐ अर्चनविधेः सर्वं परिपूर्णमस्तु' इति जलं दद्यात्' 'ॐ अस्तु' इति प्रतिवचनम्। सव्येन 'ॐ यथा चक्रायुधो विष्णुस्त्रैलोक्यं परिरक्षति, एवं मण्डलभस्मैतत्[1] सर्वभूतानि रक्षतु।'–इति देवब्राह्मणयोर्भोजनस्थाने चतुर्दिक्ष्वासनसहितं चतुष्कोणमण्डलं कुर्यात्। अपसव्येन पूर्वोक्तमन्त्रेण पितृब्राह्मणयोर्भोजनस्थाने चतुर्दिक्ष्वासनसहितं चतुष्कोण-

---

१. परंपराप्रचलितरीत्यनुसारं जलेन मण्डलं कुर्वन्ति न तु भस्मना। मन्त्रश्च विनैव उद्देत धान्यमसीतिवत पठनीयः

धान्यमसीतिवत पठनीयः

मण्डलं कुर्यात्, अपसव्येनैवाग्नौकरणं दक्षिणाभिमुखः प्राचीनावीती पातितवामजानुः पुटकादौ सघृतमन्नं कृत्वा 'ॐ अग्नौकरणमहं करिष्ये' इति पितृब्राह्मणं पृच्छेत्, 'ॐ कुरुष्व' इत्यनुज्ञातः सन् पितृब्राह्मणकरे जलपात्रे वा जुहुयात्। ॐ अग्नये कव्यवाहनाय स्वाहा, इदमग्नये कव्यवाहनाय। ॐ सोमाय पितृमते स्वाहा, इदं सोमाय पितृमते इत्याहुतिद्वयं जुहुयात्। हुतशेषान्नं सव्येन विश्वेदेवब्राह्मणपात्रोपरि क्षिपेत्, अपसव्येन पितृब्राह्मणपात्रेषु क्षिपेत्। ततोऽपसव्येनैव तिलघृतमधुजलयुतमोदकादिसहितमन्नमादाय दक्षिणाभिमुखो भूत्वा 'ॐ इदमन्नं सजलमेतद्भूस्वामिपितृभ्यो नमः' इत्युत्सृजेत्। अथान्नसङ्कल्पः। सव्येन तत्र विश्वान् देवान् ध्यायन्सोपस्कर-यवजलयुतमन्नमुपनीय मधुनाभिघार्य ऋजुहस्ताभ्यामन्नपात्रमालभ्य, 'ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽअमृतेऽअमृतं

जुहोमि स्वाहा। ॐ इदं विष्णुरित्यादि सुरे इत्यन्तं कृष्णकव्यमिदं रक्षमदीयमिति च पठित्वा विप्रदक्षिणाङ्गुष्ठं गृहीत्वा ॐ इदमन्नमित्यन्ने, ॐ इमा आपः इति जले, ॐ इदमाज्यमिति घृते, ॐ इदं हविरिति पुनरन्ने, ॐ एतान्युपकरणानि इति क्रमेणान्नजलघृतेषु विप्रदक्षिणाङ्गुष्ठं निवेश्य ॐ यवोसि इति मन्त्रेण यवानन्नोपरि विकीर्य कुशयवजलान्यादाय वामहस्ताङ्गुल्यङ्गुष्ठैः क्रमेणान्नममश्च स्पृष्ट्वा—ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिभ्यो विश्वेभ्यो देवेभ्यः पुरूरवो माद्रवो नामभ्यः अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे इदमन्नं सजलं सोपस्करं परिविष्टं परिवेक्ष्यमाणमक्षय्यतृप्तिहेतोर्वः स्वाहा इति कुशादिकमुत्सृजेत❀

❀ श्राद्धान्नस्य च संकल्पो भूमावेष प्रदीयते। हस्तेषु दीयमानं तत्पितृभ्यो नोपतिष्ठते॥

* श्राद्धमन्नस्य च संकल्पो भूमावेव प्रदीयते । हस्तेषु दीयमानं तत्पितृभ्यो नोपतिष्ठते ॥

पुनः सर्वं पूर्ववत् पिधाय कुशादिकमादाय ॐ अद्यामुकगोत्राणामस्मन्मातामह-प्रमातामह-वृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिभ्यो विश्वेभ्यो देवेभ्यः पुरूरवो माद्रवो नामभ्यः अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे इदमन्नं सजलं सोपस्करं परिविष्टं परिवेक्ष्यमाणमक्षय्यतृप्तिहेतोर्वः स्वाहा इति कुशादिकमुत्सृजेत् । ततोऽपसव्येन सोपस्करं तिलजलयुतमन्नमुपनीय मधुनाभिघार्य अधोमुखाभ्यां व्यस्ताभ्यां पाणिभ्यामन्नपात्रमालभ्य—ॐ पृथिवी ते पात्रं द्यौरपिधानं० इत्यादि स्वाहान्तं पठित्वा विप्रदक्षिणाङ्गुष्ठं गृहीत्वा ॐ इदमन्नम्, ॐ इमा आपः, ॐ इदमाज्यम्, ॐ इदं हविरिति, ॐ एतान्युपकरणनीति क्रमेणान्नजलघृतेषु विप्रदक्षिणाङ्गुष्ठं निवेश्य—ॐ अपहताऽअसुरा रक्षाᳬसि वेदिषदः, इति अन्नोपरि तिलान् विकीर्य मोटकादिन्या-

दाय वामहस्ताङ्गुष्ठाङ्गुलिभिः क्रमेणान्नमपश्च स्पृष्ट्वा, ॐ अद्यामुकगोत्रायास्मत्पित्रे❀ऽमुकशर्मणे सपत्नीकाय वसुस्वरूपाय अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे इदमन्नं सजलं सोपस्करं परिविष्टं परिवेक्ष्यमाणमक्षय्यतृप्तिहेतोस्ते स्वधा इति पितृब्राह्मणसमीपे भूमौ यव मोटकादिकमुत्सृजेत्। एवं पितामहादिभ्यः पञ्चभ्यो दद्यात्। ततः सव्येन देवब्राह्मणकरयोः 'ॐ भवन्तौ प्राशयेताम्' इत्यपोशानं दद्यात्। अपसव्येन पितृब्राह्मणकरेषु 'ॐ भवन्तः प्राशयन्तु' इत्यपोशानं दत्त्वा सव्येन श्राद्धकर्ता

❀ अत्र प्रायेण पितृ-पितामह प्रपितामहेभ्य एकः सिद्धान्नभागः, मातामह-प्रमातामह-वृद्धप्रमातामहेभ्य एकः सिद्धान्नभाग इति भागद्वयं परिकल्पितं भवति। एवं च अन्नसंकल्पवाक्ये चतुर्थी विभक्त्यन्नपदानां बहुवचनान्तत्वेन प्रयोगः कर्तव्यः—यथा ॐ अद्यामुकगोत्रेभ्यः अस्मत्पितृपितामहप्रपितामहेभ्यः इत्यादि ।

कुशोपरि विशन्—'ॐ मधुव्वाता० ॐ मधुनक्त० ॐ मधुमान्नः० इति पठित्वा, मधु ३ ❀ अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् । तत्सर्वमच्छिद्रमस्तु श्रीभास्करस्य प्रसादतः ॥ ॐ नमस्तुभ्यं विरूपाक्ष नमस्तेऽनेकचक्षुषे । नमः पिनाकहस्ताय वज्रहस्ताय वै नमः' इति पठेत् ॥ 'यथासुखं जुषध्वए' इति वचनानन्तरं ते ब्राह्मणा मौनिनो भूत्वा भुञ्जीरन् संज्ञया च भक्ष्यं प्रार्थयेयुः । तत सव्येन सव्याहृतिकां गायत्रीं जपित्वा, मधुव्वातेति ऋचः पठित्वा पितृसूक्तं' च पठेत❀ । ब्राह्मणानां यत्र यत्रेच्छोपलभ्यते तत्तत् प्रयच्छन् मन्दं मन्दं भोजयेत् । ततः पितामहान्नपात्रसन्निधौ आस्तृत-

---

❀ तदेव १६ षोडश, अग्नये कव्यवाहनाय षट ६, कृणुष्वपाज इति पञ्च ५, सुरावन्तमित्यादि अपांफेनेत्यन्तम् ३९, सहस्रशीर्षेति षोडश १६ नमस्ते इति षट्षष्टिः ६६, आशुः शिशानः द्वादश १२ इति पितृसूक्तं पठेत् ।

दक्षिणाग्रकुशत्रयायां भूमौ अपसव्येन मोटकादिकमादाय विकिरासनं दद्यात्। असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम्। उच्छिष्टभागधेयानां दर्भेषु विकिरासनम्, इति मन्त्रेण मोटकरूपमासनमास्तृतकुशोपरि उत्सृजेत्। सतिलघृतमन्नमादाय जलेनाप्लाव्य मोटकादिकं चादाय, अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम। भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम्, इति मन्त्रेणास्तृतकुशोपरि अन्नं विकिरेत्। ततः कुशान् परित्यज्य, हस्तौ पादौ प्रक्षाल्य, सव्येन द्विराचम्य, गायत्रीं जपित्वा, मधुव्वाता० इत्यादि पठेत्। ततो ब्राह्मणान् तृप्तान् ज्ञात्वा, ॐ जलगण्डूषमिदं ते इति उभाभ्यां विश्वेदेवब्राह्मणाभ्यां प्रत्येकं प्रत्यपोशानं दद्यात्। सव्येनैवाञ्जलिं बध्वा विश्वेदेवब्राह्मणौ प्रति प्रश्नः—ॐ तृप्ताः स्थ? ॐ तृप्ताः स्म इति प्रतिवचनम्। ॐ शेषमन्नं किं क्रियताम् इति प्रश्नः

'ॐ इष्टैः सह भुज्यताम्' इति प्रतिवचनम्। अपसव्येन ॐ जलगण्डूषमिदं ते, इति पितृब्राह्मणाभ्यां प्रत्येकं प्रत्यपोशानं दद्यात्। अपसव्येनैव पितृब्राह्मणौ प्रति प्रश्नः, ॐ तृप्ताः स्थ ? ॐ तृप्ताः स्म इति प्रतिवचनम्। ॐ शेषमन्नं किं क्रियताम् ? इष्टैः सह भुज्यताम् इति प्रतिवचनम्। ॐ पिण्डदानमहं करिष्ये, इति उभयत्रां[1] पृच्छेत्। ॐ कुरुष्व इत्यनुज्ञातः सन् पिण्डदानार्थं हस्तैकपरिमितां चतुरस्रां चतुरङ्गुलोच्छ्रितां सैकतादिकां[2] दक्षिणप्लवां पिण्डिकां निर्माय पिण्डिकामध्ये वामेन पाणिना दर्भपिञ्जुलीं गृहीत्वा, दक्षिणहस्ते कृत्वा सव्योपगृहीतदक्षिणपाणिना ॐ अपहताऽअसुरा रक्षाᳬसि व्वेदिषद इति मन्त्रेण दक्षिणाग्रं रेखाद्वयं

---

१. सव्येन विश्वेदेवब्राह्मणान् अपसव्येन पितृब्राह्मणाँश्च।

२. उपलिप्ते शुचौ देशे स्थाने कुर्वीत सैकतम्। मण्डलं चतुरस्रं वा दक्षिणावनतं महत्॥

कृत्वा[१] दर्भपिञ्जुलीमुत्तरस्यां क्षिपेत्। तदुपरि, ॐ ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति। परा पुरो निपुरो ये भरन्त्यग्निष्टाँल्लोकान् प्रणुदात्यस्मात्, इति मन्त्रेणाङ्गारं भ्रामयित्वा, तदङ्गारं दक्षिणस्यां क्षिपेत्। ततो जलेन शन्नोदेवीरिति पिण्डिकासेचनम्, तदनु छिन्नमूलकुशान् दक्षिणाग्रान् पिण्डिकायां आस्तीर्य सव्येन, ॐ देवताभ्यः० इति त्रिः पठेत्। अपसव्यं विधाय एवं पुटकं वामहस्ते कृत्वा मोटकादिकमादाय, ॐ अद्यामुकगोत्र अस्मत्पितरमुकशर्मन् सपत्नीक वसुस्वरूपाद्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे पिण्डस्थानेऽत्रावने निक्ष्व ते स्वधा इति छिन्नमूलकुशोपरि अवनेजनं दद्यात्, एवं पितामहादिभ्यः पञ्चभ्यो[२]

१. अनन्तर्गर्भितं साग्रं कोशं द्विदलमेव च। प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्।

२. तातास्बात्रितयमिति तर्पणविधि-निर्दिष्टश्लोकानुसारं पित्रव्यादिसर्वेभ्यः पिंडा देयाः॥

२. तातम्बात्रितयमिति तर्पणविधि-निर्दिष्टश्लोकानुसारं पितृव्यादिसर्वेभ्यः पिंडा देयाः ॥

दद्यात् । ततः पिण्डान् निर्माय मोटकादीनि प्रथमपिण्डं चादाय वामहस्ते पुटकादिस्थजलमादाय–ॐ अद्यामुकगोत्र अस्मत्पितरमुकशर्मन् सपत्नीक वसुस्वरूप अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे एष पिण्डोमृत-स्वरूपोऽक्षय्यतृप्तिहेतोस्ते स्वधा इत्यवनेजनोपरि पिण्डं दद्यात् । एवं पितामहादिभ्यः पञ्चभ्यः अवनेजनोपरि पिण्डं दद्यात् । ततः आस्तृतकुश-मूलेन 'लेपभागभुजस्तृप्यन्तु' इति करं प्रोक्ष्य सव्यं कृत्वा द्विराचम्य हरिं स्मरेत् । ततः सव्येनैव पुष्पादीन्यादाय पित्रादीनुद्दिश्य, 'ॐ अत्र पितरो मादयध्वं यथाभागमावृषायध्वम्' इति वामावर्तेन वेद्या दक्षिणस्यां दिशि उत्तराभिमुखो भूत्वा श्वासं नियम्य भास्करमूर्तीन् पितॄन् ध्यायन् अपसव्यं कृत्वा दक्षिणावर्तेन आसने समागत्य दक्षिणाभिमुखो भूत्वा ॐ अमीम-दन्तपितरो यथाभागमावृषायिषत । इति मन्त्रेण पुष्पादिकं पिण्डेषु

क्षिपेत्। ततः प्रत्यवनेजनपात्रं वामहस्ते कृत्वा मोटकादिकमादाय ॐ अद्यामुकगोत्रास्मत्पितुरमुकशर्मन् सपत्नीक वसुस्वरूप अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे इदं पिण्डप्रत्यवनेजनं ते स्वधा इति पितृपिण्डे प्रत्यवनेजनं दद्यात्। एवं पितामहादिपञ्चपिण्डेषु प्रत्यवनेजनं दद्यात्। ततो नीवीं विस्रंस्य सव्यं कृत्वा आचम्य हरिं स्मरेत्। ततः अपसव्यं कृत्वा वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय—ॐ नमो वः पितरो रसाय[१], नमो वः पितरः शोषाय[२], नमो वः पितरो जीवाय[३], नमो वः पितरः स्वधायै[४], नमो वः पितरो घोराय[५], नमो वः पितरो मन्यवे[६] नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्तासतो वः पितरो देष्मै तद्वः पितरो वासः आधत्त. इति मन्त्रेण षट्कृत्वो नमस्कारं कुर्वन् प्रत्येकं पिण्डोपरि सूत्रं दद्यात्।

अथवत्त, इति मन्त्रेण षट्कृत्वा नमस्कारं कुर्वन् प्रत्येकं पिण्डोपरि सूत्रं दद्यात् ।

ततः क्रमेण प्रत्येकं पिण्डान् गन्धादिभिः संपूज्य धूपदीपौ च कारयेत् । मोटकादिकमादाय—ॐ अद्यामुकगोत्राः अस्मत्पितृपितामहप्रपितामहाः अमुकामुकामुकशर्माणः सपत्नीकाः वसुरुद्रादित्यस्वरूपाः अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे एतानि पिण्डार्चनानि अत्रसूत्रगन्धपुष्पाक्षतधूपदीपैक्षवादिनैवेद्यानि त्रेधा विभज्य युष्मभ्यं स्वधा इति पित्रादिभ्यो गन्धादिकमुत्सृजेत् । पुनरपि मोटकादिकमादाय—ॐ अद्यामुकगोत्राः अस्मन्मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकामुकशर्माणः सपत्नीकाः वसुरुद्रादित्यस्वरूपाः अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे एतानि पिण्डार्चनानि अत्रसूत्रगन्धपुष्पाक्षतधूपदीपैक्षवादिनैवेद्यानि त्रेधा विभज्य युष्मभ्यं स्वधा इति मातामहादिभ्यो गन्धादिकमुत्सृजेत्[1] ।

१. एतमेव सर्वसंबन्धिपिण्डेष्वपि विधेयम् ।

ततः सव्येन विश्वेदेवब्राह्मणकरयोः 'ॐ शिवा आपः सन्तु' इति जलम् 'ॐ सौमनस्यमस्तु' इति पुष्पम्, 'ॐ अक्षतं चारिष्टमस्तु' इति तण्डुलान् प्रत्येकं दद्यात्। अपसव्येन पितृब्राह्मणकरयोः 'ॐ शिवा आपः सन्तु' इति जलम्, 'ॐ सौमनस्यमस्तु' इति पुष्पम्, 'ॐ अक्षतं चारिष्टमस्तु' इति तण्डुलान् प्रत्येकं दद्यात्। सव्येनाञ्जलिं बद्ध्वा पूर्वाभिमुखो भूत्वा इति पठेत्—ॐ अपां मध्ये स्थिता देवाः सर्वमप्सुप्रतिष्ठितम्। ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवन्तु मे॥ लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे। लक्ष्मीर्वसति गोष्ठेषु सौमनस्यं ददातु मे॥ अक्षयं चास्तु मे पुण्यं शान्तिः पुष्टिर्धृतिस्तथा। यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम॥ ततः कर्मपात्रोदकं कुशैर्गृहीत्वा प्रतिमन्त्रं स्वशिरस्यभिषिञ्चेत्—अस्मत्कुले दीर्घमायुरस्तु, ॐ शान्तिरस्तु, ॐ पुष्टिरस्तु, ॐ वृद्धिरस्तु, ॐ यच्छ्रेयस्त-

...स्तु, ॐ शान्तिरस्तु, ॐ पुष्टिरस्तु, ॐ वृद्धिरस्तु, ॐ यच्छ्रेयस्त-

दस्तु, ॐ यत् पापं तत् प्रतिहतमस्तु इति भूमौ, ॐ द्विपदे चतुष्पदेभ्यः शान्तिर्भवतु । ततोऽपसव्येन पिण्डशेषान्नं पिण्डसमीपे विकिरेत् । वामहस्ते पुटकादिस्थजलं गृहीत्वा मोटकादिकमादाय—ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः सपत्नीकस्य वसुस्वरूपस्य अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे दत्तैतदन्नपानादिकमक्षय्यमस्तु इति पितृपिण्डोपरि अक्षय्योदकं दद्यात् । एवं पितामहादिपञ्चपिण्डेभ्योऽन्येभ्यः संबन्धिभ्यश्च दद्यात् । ततः सव्येन कृताञ्जलिर्दक्षिणां दिशमवलोकयन्—'ॐ अघोराः पितरः सन्तु' इति पिण्डोपरि पूर्वाग्रां जलधारां दद्यात् । सव्येनैव प्राङ्मुखोऽञ्जलिं बद्ध्वा आशिषः प्रार्थयेत्—ॐ गोत्रन्नो वर्धताम्, ॐ वर्धताम् इति प्रतिवचनम् । ॐ दातारो नोऽभिवर्धन्ताम् ॐ वर्धन्ताम् इति प्रतिवचनम् । ॐ वेदा वर्धन्ताम्, ॐ वर्धन्ताम् इति प्रतिवचनम् । ॐ सन्ततिर्वर्धताम्

ॐ वर्धताम् इति प्रतिवचनम्। ॐ श्रद्धा च नो माऽव्यगमत् ॐ मागात् इति प्रतिवचनम्। ॐ बहुदेयं च नोऽस्तु ॐ अस्तु इति प्रतिवचनम्। ॐ अन्नं च नो बहु भवेत् ॐ भवतु इति प्रतिवचनम्। ॐ अतिथींश्च लभेमहि ॐ लभध्वम् इति प्रतिवचनम्। ॐ याचितारश्च नः सन्तु ॐ सन्तु इति प्रतिवचनम् ॐ मा याचिष्म कञ्चन ॐ मा याचेथाः इति प्रतिवचनम्। एता आशिषः सत्याः सन्तु ॐ सन्तु इति प्रतिवचनम्। ततः श्राद्धकर्ता ब्राह्मणहस्तेन तिलकं कुर्यात्। ॐ यं कामं कामयते सोऽस्मै कामः समृध्यतामिति मन्त्रेण। ततः अपसव्येन सपवित्रान् कुशान्न्युब्जपात्राधः-स्थितान् पिण्डसमीपे भूमौ निक्षिप्य, ॐ स्वधां वाचयिष्ये, ॐ वाच्यताम् इति प्रतिवचनानन्तरं रिक्ताञ्जलिना—ॐ अद्यामुकगोत्रेभ्योऽस्मत्पितृपितामह-प्रपितामहेभ्योऽमुकामुकामुकशर्मभ्यः सपत्नीकेभ्यो वसुरुद्रादित्यस्वरूपे-

भ्यस्तथाऽमुकगोत्रेभ्यो अस्मन्मातामहप्रमातामहवृद्धप्रमातामहेभ्योऽमुकामुकामुकशर्मभ्यः सपत्नीकेभ्यो वसुरुद्रादित्यस्वरूपेभ्यः अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे स्वधोच्यताम् 'ॐ अस्तु स्वधा' इति प्रतिवचनम् । ततः पयसादिसहितं पुटकं वामहस्ते कृत्वा–ॐ ऊर्जम्बहन्तीरिति-मन्त्रेण सपवित्रकुशोपरि दक्षिणाग्रां पयोधारां[१] दद्यात् । ततः 'ॐ पिण्डाः सम्पन्नाः' 'ॐ सुसम्पन्ना' इति प्रतिवचनम् । 'ॐ पिण्डानुत्थापयामि' ॐ उत्थापयस्व' इत्यनुज्ञातः सन्पिण्डानुत्थापयेत् । सव्येन पिण्डानाघ्राय पिण्डाधारकुशानुल्मुकाँश्च वह्नौ क्षिपेत् । सव्येनैव पिण्डिकायां शंखं चक्रं च लिखेत् । 'ॐ शंखाय नमः, ॐ चक्राय नमः' इति यवैः शंखचक्रपूजां विधाय । अपसव्यं कृत्वा–ॐ गयायां पितृरूपेण स्वयमेव जनार्दनः । तं दृष्ट्वा पुण्डरीकाक्षं

१. श्रौतसूत्र-याज्ञवल्क्यस्मृति-पारस्करीयश्राद्धसूत्रानुसारं जलधारां दद्यात् ।

मुच्यते च ऋणत्रयात्, इति मन्त्रेण पिण्डान् पिण्डिकोपरि निधाय सव्येन पूजयेदेभिर्मन्त्रैः—'ॐ वसन्ताय नमस्तुभ्यं ग्रीष्माय च नमो नमः। वर्षाभ्यश्च शरत्संज्ञ ऋतवे च नमो नमः। हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च। माससंवत्सरेभ्यश्च दिवसेभ्यो नमो नमः। कर्पूरदीपं दत्त्वा ततः सव्येनैव विश्वेदेवार्घपात्रं सञ्चाल्य, अपसव्येन पित्रर्घपात्राण्युत्तानीकृत्य, सव्येन दक्षिणां दद्यात्। कुशयवजलदक्षिणाद्रव्याण्यादाय—'ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां पुरूरवोमाद्रवोनाम्नामद्यकृतैतन्महालयापरपक्षान्तर्गतपार्वणश्राद्धे श्राद्धसम्बन्धिवैश्वदैविकश्राद्धप्रतिष्ठासिद्ध्यर्थं दक्षिणां हिरण्यमग्निदैवतं तन्मूल्योपकल्पितं द्रव्यं यथादैवतममुकगोत्राय

पार्वणश्राद्धविधि ८३

पुनर्दक्षिणासहितकुशादिकमादाय—ॐ अमुकगोत्राणामस्मन्मातामहप्रमाता-महवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्व-रूपाणाम् पुरूरवोमाद्रवोनाम्नामद्यकृतैतन्महालयापरपक्षान्तर्गतपार्वण-श्राद्धसम्बन्धिवैश्वदेविकश्राद्धप्रतिष्ठासिद्ध्यर्थं दक्षिणां हिरण्यमग्निदैवतं तन्मूल्योपकल्पितं द्रव्यं यथानामदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे, इति ब्राह्मणकरे उत्सृजेत्। कुशतिलजलदक्षिणाद्रव्याण्यादा-य ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणाम् अद्यकृतैतन्महालयापरपक्षान्तर्गतपा-र्वणश्राद्धप्रतिष्ठासिद्ध्यर्थं दक्षिणां रजतं चन्द्रदैवतं तन्मूल्योपकल्पितं द्रव्यं यथानामदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे। पुनः कुशतिलजलदक्षिणाद्रव्याण्यादाय—ॐ अद्यामुकगोत्राणामस्मन्मातामह-

प्रमातामहवृद्धप्रमातामहानाममुकाऽमुकामुकशर्मणां सपत्नीकानां वसुरुद्रादि-
त्यस्वरूपाणाम् अद्यकृतैतन्महालयापरपक्षान्तर्गतपार्वणश्राद्धप्रतिष्ठासिद्ध्यर्थं
दक्षिणां रजतं चन्द्रदैवतं तन्मूल्योपकल्पितं द्रव्यं यथानामदैवतममुकगोत्रायाा-
मुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति ब्राह्मणकरे उत्सृजेत। पुनः
कुशतिलजलभूयसीदक्षिणाद्रव्याण्यादाय—ॐअद्यामुकगोत्राणाम् अस्मत्पि-
तृपितामहप्रपितामहानाममुकाऽमुकामुकशर्मणां सपत्नीकानां वसुरुद्रादि-
त्यस्वरूपाणां तथा अमुकगोत्राणां अस्मन्मातामहप्रमातामहवृद्धप्रमातामहा-
नाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां विश्वेदेव-
पूर्वकाणाम् अद्य कृतैतन्महालयापरपक्षान्तर्गतपार्वणश्राद्धे न्यूनातिरिक्तपरि-
पूर्णार्थं यद्देयम् अन्नादिकं दक्षिणाद्रव्यं यथानामदैवतं नानानामगोत्रेभ्यो नाना
नामशर्मभ्यो ब्राह्मणेभ्यः कन्याकुमारेभ्यश्च यथाभागं विभज्य दातुमहमुत्सृजे

इत्युत्सृजेत् । अपसव्येन—ॐ व्वाजे व्वाजे वतव्वाजिनो नो धनेषु व्विप्राऽअमृताऽऋतज्ञाः । अस्य मध्व पिबत मादयध्वं तृप्ता यात पथिभिर्द्देवयानैः । इति मन्त्रेण पित्रादीन् विसर्जयेत ॥ ततः सव्यं कृत्वा—पुरूरवो माद्रवो नामानो विश्वेदेवाः प्रीयन्तामिति विश्वेदेवविसर्जनम् ॥ ततः ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च । नमः स्वाहायै स्वधायै नित्यमेव नमो नमः । इति त्रिः पठेत् ॥ अपसव्येन दीपाच्छादनं विधाय । सव्येन हस्तौ पादौ प्रक्ष्याल्याचम्य इति पठेत्—ॐ यत्कृतं तत् सुकृतमस्तु, यन्न कृतं तद्विष्णोः प्रसादात् ब्राह्मणवचनात्सर्वं परिपूर्णमस्तु ॥१॥ ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च ॥ स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥२॥ आयुः प्रजां धनं विद्यां स्वर्ग-मोक्ष-सुखानि च ॥ प्रयच्छन्तु तथा राज्यं पितरः श्राद्ध-

तर्पिताः ॥३॥ कायेन वाचा० । यस्य स्मृत्या० । चतुर्भिश्च० । ॐ अच्युताय नमः, ॐ अच्युताय नमः, ॐ अच्युताय नमः—इति पार्वणश्राद्धविधिः ॥

अथ तीर्थश्राद्धविधिः

अत्र स्मृतिः—आसनं पिण्डदानं च पुनः प्रत्यवनेजनम् । दक्षिणा चान्नसंकल्पः सर्वतीर्थेष्वयं विधिः ॥ १ ॥ हस्तौ पादौ प्रक्षाल्य, आचम्य, यद्देवादेवहेडनमित्यादि कण्डिकात्रयेण कर्मपात्रं विधाय कुशात्रयसहितं कर्मपात्रोदकमादाय—ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा । यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ २ ॥ 'श्रीविष्णुः पुण्डरीकाक्षः

पुनातु' इत्यनेन श्राद्धीयवस्तूनि सिञ्चेत्। आत्मानमपि सिञ्चेत्। ततः करौ संपुटीकृत्य विष्णुं मनसा ध्यात्वा पूर्वमुखः प्रार्थयेत्—ॐ नमो नमस्ते गोविन्द पुराणपुरुषोत्तम! इदं श्राद्धं हृषीकेश रक्षतां सर्वतो दिशः ॥३॥ ततः तीर्थश्राद्धनिमित्तं संकल्पं कुर्यात्। तद्यथा, ॐ तत्सदद्या-मुकमासेऽमुकपक्षेऽमुकतिथावमुकवासरेऽमुकतीर्थे मम आत्मनः समस्त-पितृणां समुद्धारणार्थं मातृपितृगुरुस्वस्रादिपितृणामक्षय्यतृप्तिहेतवे समस्त-तीर्थश्राद्धजन्यफलप्राप्त्यर्थम् अमुकतीर्थे तीर्थश्राद्धं पिण्डदानं चाहं करिष्ये ॥ ४ ॥ ततो दक्षिणाभिमुखः प्राचीनावीतिरपसव्यं विधाय पातितवामजानु दक्षिणनम्रां वेदीं निर्माय पञ्चगव्येनाभिषिच्य परितः तिलगौरसर्षपपुष्पचन्दनानि विकिरेत् ॥ ५ ॥ वेद्यां द्विगुण-भुग्नत्रिकुश-रूपाण्यासनानि द्वादश प्रत्येकं स्थापयेत् ॥ अनेन मन्त्रेण—अयोध्या मथुरा

माया काशी काञ्ची अवन्तिका। पुरी द्वारावती चैव सप्तैता मोक्ष-
दायकाः ॥ ॐ कव्यवाडनलः सोमो यमश्चैवार्यमा तथा। अग्निष्वात्ता
बर्हिषदः सोमपाः पितरस्तथा इति ॥ ६ ॥ ततः आसनोपरि तिलजलपुष्प-
गन्धादीनि पात्रे कृत्वा कुशादिकमादाय—ॐअद्यामुकगोत्राणां मम पितृ-
पितामहप्रपितामहानाममुकामुकामुकशर्मणांसपत्नीकानांतथाऽमुकगोत्राणा
मासनोपरि अवनेजनमहं सम्प्रददे ॥७॥ एवं मातामहप्रमातामहवृद्धप्रमाता-
महानाममुकामुकामुकशर्मणां सपत्नीकानां यथायथागोत्राणामन्येषां च
पितॄणां आसनोपरि अवनेजनमहं सम्प्रददे इत्यनेनासनोपरि पात्रस्थं जल-
मर्द्धं दद्यात्, अर्धं जलम् अवशेषयेत् ॥८॥ ततः पिण्डमादाय—ॐअद्या-
मुकगोत्रस्यास्मत्पितुरमुकनाम्नः तस्य अक्षय्यतृप्त्यर्थमिदं हविष्यान्नमयम्
अमृतरूपं मधुतिलजलादिप्रोक्षितं पिण्डं तस्मै स्वधा ॥९॥ ॐ अद्यामुक-

गोत्रोऽस्मत्पितामहः अमुकनामा तस्याक्षय्यतृप्त्यर्थमिदं हविष्यान्नमयम् अमृतरूपं तिलमधुजलप्रोक्षित पिण्डं तस्मै स्वधा ॥१०॥ ॐ अद्यामुकगोत्रोऽस्मत्प्रपितामहोऽमुकनामा तस्य अक्षय्यतृप्त्यर्थमिदं हविष्यान्नमयम् अमृतरूपं तिलमधुजलप्रोक्षितं पिण्डं तस्मै स्वधा ॥११॥ ॐ अद्यामुकगोत्राया मम मातुरमुकदेव्या अक्षय्यतृप्त्यर्थम् इदं हविष्यान्नमयम् अमृतरूपं मधुतिलजलप्रोक्षितं पिण्डं तस्यै स्वधा ॥१२॥ ॐ अद्य अमुकगोत्रा मम पितामही अमुक नाम्नी देवी तस्या अक्षय्यतृप्त्यर्थम् इदं हविष्यान्नमयम् अमृतरूपं मधुतिलजलप्रोक्षितं पिण्डं तस्यै स्वधा ॥१३॥ ॐ अद्यामुकगोत्रामम प्रपितामही अमुकनाम्नी देवी तस्या अक्षय्यतृप्त्यर्थम् इदम् हविष्यान्नमयममृतरूपं मधुतिलजलप्रोक्षितं पिण्डं तस्यै स्वधा ॥१४॥ ॐ अद्यामुकगोत्रः अस्मन्मातामहोऽमुकनामा तस्य अक्षय्यतृप्त्यर्थम् इदम् हविष्यान्नमयम्

अमृतरूपं मधुतिलजलप्रोक्षितं पिण्डं तस्मै स्वधा ॥१५॥ ॐ अद्यामुकगोत्रः अस्मत्प्रमातामहोऽमुकनामा तस्य अक्षय्यतृप्त्यर्थम् इदं हविष्यान्नमयम् अमृतरूपं मधुतिलजलादिप्रोक्षितं पिण्डं तस्मै स्वधा ॥१६॥ ॐ अद्यामुकगोत्रः अस्मद्वृद्धप्रमातामहोऽमुकनामा तस्य अक्षय्यतृप्त्यर्थम् इदं हविष्यान्नमयम् अमृतरूपं मधुतिलजलप्रोक्षितं पिण्डं तस्मै स्वधा ॥१७॥ ॐ अद्यामुकगोत्रा अस्मन्मातामही अमुकनाम्नी देवी तस्या अक्षय्यतृप्त्यर्थम् इदं हविष्यान्नमयम् अमृतरूपं मधुतिलजलादिप्रोक्षितं पिण्डं तस्यै स्वधा ॥१८॥ ॐ अद्यामुकगोत्रा अस्मत्प्रमातामही अमुकनाम्नी देवी तस्या अक्षय्यतृप्त्यर्थम् इदं हविष्यान्नमयं मधुतिलजलादिप्रोक्षितं पिण्डं तस्यै स्वधा ॥१९॥ ॐ अद्यामुकगोत्रा अस्मद्वृद्धप्रमातामही अमुकनाम्नी देवी तस्या अक्षय्यतृप्त्यर्थम् इदं हविष्यान्नमयं मधुतिलजला-

अमुकनाम्नी देवी तस्याः अक्षय्यतृप्त्यर्थम् इदं हविष्यान्नमयं मधुतिलजला-

दिप्रोक्षितं पिण्डं तस्यै स्वधा ॥ २० ॥ एवं सपत्नजननी-पत्नी-पुत्र-कन्या-पितृव्य—मातुल—भ्रातृ—पितृस्वसृ—मातृस्वस्रात्मभगिनी—पितृव्यपुत्र—जामातृ—भागिनेय—श्वशुर—श्वश्र्वाचार्योपाध्याय-गुरु-मित्र-शिष्याणामेतेषां पुरुषविषये सपत्नीकानां स्त्रीविषये सभर्तृकसापत्यानां यथानाम गोत्रोच्चारण-पूर्वकं स्वरूपोच्चारणं कृत्वा पिण्डान् दद्यात् ॥२१॥ ॐ आब्रह्मणो ये पितृ-

वंशजाता मातुस्तथा वंशभवा मदीयाः । वंशद्वये ये मम दासभूता भृत्यास्त-
था वाऽऽश्रितसेवकाश्च । मित्राणि शिष्याः पशवश्च वृक्षा दृष्टाश्च स्पृष्टाश्च
कृतोपकाराः । जन्मान्तरे ये मम सङ्गताश्च तेभ्यः स्वधा पिण्डमहं ददामि ।१।
ये केचित्प्रेतरूपेण वर्तन्ते पितरो मम । ते सर्वे तृप्तिमायान्तु पिण्डदानेन
शाश्वतीम् ॥२॥ ये बान्धवाऽबान्धवा ये येऽन्यजन्मनि बान्धवाः । तेभ्यः
पिंडो मया दत्तः अक्षय्यमुपतिष्ठतु ॥३॥ पितृवंशे मृता ये च मातृवंशे

तथैव च। गुरुश्वशुरबन्धूनां ये चाऽन्ये बान्धवा स्मृताः ॥४॥ ये मे कुले लुप्तपिण्डाः पुत्रदारविवर्जिताः। तेभ्यः पिण्डो मया दत्तः अक्षय्यमुपतिष्ठतु ॥५॥ ॐ अद्यामुकगोत्राणां मम पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां तथा मातृपितामही-प्रपितामहीनाममुकामुकामुकदेवीनां पिण्डोपरि प्रत्यवनेजनं सम्प्रददे। इति एवं मातामह-प्रमातामह वृद्धप्रमातामहानां सपत्नीकानां पिण्डोपरि प्रत्यवनेजनं सम्प्रददे इत्यनेन पिण्डोपरि अर्धशेषजलं दद्यात् ॥ ६ ततः पिण्डपूजनम्। गन्धपुष्पधूपदीपनैवेद्यताम्बूलपूग फलैलालवङ्गयज्ञोपवीतवस्त्रतुलसीदलादिकं दत्वा जलेन नामगोत्रोच्चारणं कृत्वा तर्पणं कुर्यात् ॥७॥ ततः सव्यं कृत्वा आचमनम् ॥८॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च। स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥–विष्णुस्मरणं कुर्यात् ॥९॥ ततः–एहि सूर्य सहस्रांशो

तीर्थश्राद्धविधि ६३

तेजोराशे जगत्पते । अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिवाकर ॥१०॥ इति सूर्याय अर्घ्यं दत्त्वा नमस्कारं च कृत्वा यथाशक्त्या ब्राह्मणपूजनं भोजनदक्षिणादानं च कुर्यात् । ॐ अद्यकृतैतत्तीर्थश्राद्धसांगतासिद्ध्यर्थं मम समस्तपितृणाम् अक्षय्यतृप्त्यर्थम् आत्मना सह सर्वेषामुद्धरणाय न्यूनातिरिक्तदोषपरिहारार्थम् इदं रजतं चन्द्रदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणात्वेन तुभ्यमहं सम्प्रददे । ॐ स्वस्तीति प्रतिवचनम् । ॐ नमो वः० । ततोऽभिगम्यतामिति विसर्जनम् । पिण्डानाघ्रायोत्थाप्य जले गवे वा दद्यात् । शेषं कुशादिकं जले निक्षिपेत् ॥११॥ सुरभिर्वैष्णवी माता नित्यं विष्णुपदे स्थिता । गोग्रासं च मया दत्तं त्वं गृहाणानुकम्पया ॥१॥ इति गोग्रासम् । द्वौ श्वानौ श्यामशबलौ वैवस्वतकुलोद्भवौ । ताभ्यामन्नं प्रयच्छामि स्याता-मेतावहिंसकौ ॥२॥ इति श्वानबलिः ॥ काकोऽसि यमदूतोऽसि वाय-

सोऽसि महाबल। तुभ्यं बलिं प्रदास्यामि गृहाण यमकिङ्कर ॥३॥ इति काकबलिः ॥ यत्फलं कपिलादाने कार्तिक्यां ज्येष्ठपुष्करे। तत्फलं पाण्डवश्रेष्ठ विप्राणां पादशौचने ॥४॥ इत्यनेन विप्रदक्षिणपादप्रक्षालनम्। विप्रपादोदकं पीत्वा यावत्तिष्ठति मेदिनी। तावत्पुष्करतीर्थेऽपि पिबन्ति पितरो जलम् ॥५॥ इत्यनेन वामपादप्रक्षालनम्। चन्दनं वन्द्यते नित्यं पवित्रं पापनाशनम्। आपदो हरते नित्यं लक्ष्मीर्वसतु सर्वदा ॥६॥ इत्यनेन तिलककरणम्। हेमाद्रौ–अर्घमावाहनं चैव द्विजाङ्गुष्ठनिवेशनम् ॥ तृप्तिप्रश्नं च विकिरं तीर्थश्राद्धे विवर्जयेत् ॥७॥ नाग्नौकरणं न नेतारं न च बलिर्वैश्वदेवता पाद्मे०, तीर्थश्राद्धं प्रकुर्वीत पक्वान्नेन विशेषतः। आमान्नेन हिरण्येन कन्दमूलैः फलैरपि ॥८॥ इति तीर्थश्राद्धविधिः।

हरिः ॐ शतमिन्नु शरदोऽअन्तिदेवा यत्रानश्चक्राजरसन्तनूनाम् ।

पुत्रासो यत्र पितरो भवन्ति मा नो मद्ध्यारीरिषतायुर्गन्तोः ॥ १ ॥
अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्माता सपिता सपुत्रा । विश्वेदेवाऽअदि-
तिः पञ्चजनाऽअदितिर्ज्जातमदितिर्ज्जनित्वम् ॥२॥ स्वादुषᳬं सदः पितरो
व्वयोधाः कृच्छ्रेश्रितः शक्तिवन्तो गभीराः । चित्रसेनऽइषुबलाऽअमृध्राः
सतोवीराऽउरवोव्व्रातसाहाः ॥ ३ ॥ ब्राह्मणासः पितरः सोम्म्यासः शिवे नो
द्यावापृथिवी अनेहसा ॥ पूषानः पातु दुरितादृतावृधो रक्षामाकीर्नो
अघशᳬं सऽईशत ॥ ४ ॥ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः
स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः ॥ अक्षन्-
पितरोमीमदन्त पितरोतीतृपन्त पितरः पितरः शुन्धद्ध्वम् ॥ ५ ॥ पुनन्तु
मा पितरः सोम्म्यासः पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः पवित्रेण

शतयुषा पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः पवित्रेण शतायुषा व्विश्वमायुर्व्यश्णवै ॥ ६ ॥

—: ❀ :—

अथ एकपार्वणश्राद्धविधिः

श्रीगणेशाय नमः ॥ अत्र त्रयः पिण्डा एको विश्वेदेवब्राह्मणः । आचम्य[1] प्राणानायम्य गोमयोपलिप्ते[2] प्राङ्गणे दीपं प्रज्वाल्य ॐ रक्षोघ्नदीपाय नमः, इति दीपं सम्पूज्य 'ॐ पवित्रेस्थो वैष्णव्यौ' इति

---

१. श्राद्धारम्भेऽवसाने च पादशौचे तथार्चने । विकरे पिण्डदाने च षट्स्वाचमनमिष्यते ॥ इति मनुः ।

२. शुचिदेशं विविक्तं नु गोमयेनोपलेपयेत् । श्राद्धे दीपप्रदानेन तेजस्वी जायते नरः । दीपहीने ददेच्छ्राद्धमन्धे तमसि मज्जति ।—इति ब्राह्मे ।

तेजस्वी जायते नरः । दीपहीने
दहेच्चाद्यन्धे तमसि मज्जति ।—इति नाग्ने ।

मन्त्रेण ब्राह्मणं पवित्रं कृत्वा[१] सव्येन ताम्बूलादिकं विप्रहस्ते दत्त्वा पूर्वाभिमुखो विश्वेदेवब्राह्मणस्य वामहस्तेन दक्षिणजानु स्पृष्ट्वा स्वदक्षिणजानु च पातयित्वा अधोमुखेन स्वदक्षिणहस्तेन सताम्बूलादिकम् उत्तानं विप्रकरं गृहीत्वा निमन्त्रयेत् ॥ अद्येत्यादि अमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिनां विश्वेषां देवानां पुरूरवोमाद्रवोनाम्नामद्यकर्तव्यसांवत्सरिकैकपार्वणश्राद्धे एभिश्चन्दनपुष्पाक्षतपूगीफलयज्ञोपवीतवासोभिस्त्वं मया निमन्त्रितः । ॐ निमन्त्रितोस्मीति प्रतिवचनम् ॥ ततोऽपसव्यं कृत्वा ताम्बूलादिकं विप्रहस्ते दत्त्वा दक्षिणाभिमुखो वामहस्तेन पितृब्राह्मणस्य वामजानु स्पृष्ट्वा स्ववामजानु च पातयित्वा

१. निधाय वा दर्भवटूनासनेषु समाहितः । प्रैषाऽनुप्रैषसंयुक्तं पर्वश्राद्धं प्रकल्पयेत् ॥ इति ॥

उत्तानेन स्वदक्षिणकरेण सताम्बूलादिकं विप्रकरं गृहीत्वा निमन्त्रयेत् ॐ अद्येत्यादि अमुकगोत्राणामस्मात्पितृपितामहप्रपितामहानाममुकामुकामुक-शर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणाम् अद्यकर्तव्यसांवत्सरिकैक-पार्वणश्राद्धे एभिश्चन्दनपुष्पाक्षतपूगीफलयज्ञोपवीतवासोभिस्त्वं मया निमन्त्रितः ॥ ॐ निमन्त्रितोऽस्मि—इति प्रतिवचनम् । अक्रोधनैः शौचपरैः सततं ब्रह्मवादिभिः । भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा ॥ सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः । भवितव्यं भवद्भिर्नोऽद्यतने श्राद्ध-कर्मणि ॥ ॐ भवितव्यम् इति प्रतिवचनम् ॥ ततः सव्येन विश्वेदेवब्राह्म-णस्य चरणौ प्रक्षालयेत् । ॐ नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षि-शिरोरुबाहवे । सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटियुगधारिणे नमः ॥२॥ ततः पाद्यपात्रं वामहस्ते कृत्वा—ॐ शन्नोदेवीरभिष्टयऽआपो-

नमः ॥२॥ ततः पाद्यपात्रं वामहस्ते कृत्वा—ॐ शन्नोदेवीरभिष्टयऽआपो-

भवन्तु पीतये ॥ शंय्योरभिस्रवन्तु नः ॥ इति मन्त्रं पठित्वा कुशादिकमा-
दाय—ॐ अद्येहाऽमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुका-
मुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिनो विश्वेदेवाः
पुरूरवौ माद्रवौ नामान एष पादार्घो वः स्वाहा ॥ ततोऽपसव्येन पितृब्राह्म-
णस्य चरणौ प्रक्षालयेत् ॥ ॐ नमोस्त्वनन्ताय० इत्यादिना ॥ यत्फलं कपिला-
दाने कार्त्तिक्यां ज्येष्ठपुष्करे । तत्फलं पाण्डवश्रेष्ठ विप्राणां पादशौचने ॥
विप्रपादोदकक्लिन्ना यावत्तिष्ठति मेदिनी । तावत्पुष्करपात्रेषु पिबन्ति
पितरो जलम् । इति पठित्वा पाद्यपात्रं वामहस्ते कृत्वा शन्नोदेवीरिति-
मन्त्रान्ते मोटकमादाय—ॐ अद्येहामुकगोत्रा अस्मत्पितृपितामहप्रपितामहा
अमुकामुकामुकशर्मणः सपत्नीकाः वसुरुद्रादित्यस्वरूपा अद्यकर्त्तव्यसांव-
त्सरिकैकपार्वणश्राद्धे एष पादार्घस्त्रेधा विभज्य युष्मभ्यं स्वधा ॥ ततः

सव्येनाऽऽचम्य गृहं प्रवेशयेत्—ॐ आगता यूयम् । ॐ सुस्वागता वयम् ॥ ॐ इदमासनम् आस्यताम् ॥ ॐ आसे इति प्रतिवचनम् ॥ ॐ भूर्भुवः स्वरितिमन्त्रेण विश्वेदेवब्राह्मणं पूर्वाभिमुखमुपवेशयेत् । ततोऽपसव्येन— ॐ आगता यूयम् । ॐ सुस्वागता वयम् । ॐ इदमासनमास्यताम् । ॐ आसे इति प्रतिवचनम् । भूर्भुवः स्वरिति मन्त्रेण पितृब्राह्मणमुदङ्मुखमुपवेशयेत् । ततः सव्येन—ॐ कर्मपात्रमहं करिष्ये—इति पृच्छेत् । कुरुष्व इत्यनुज्ञातः सन् ॐ यद्देवादेवहेडनं देवासश्च कृमा व्वयम् । अग्निर्मातस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ॥ यदि दिवा यदि नक्तमेनाꣳसि च कृमा व्वयम् व्वायुर्मातस्मादेनसो विश्वान्मुञ्चत्वꣳ हसः ॥ यदि जाग्रद्यदि स्वप्नऽएनाꣳसि च कृमा व्वयम् । सूर्य्योमातास्मादेनसोव्विश्वान्मुञ्चत्वꣳ हसः ॥ कर्मपात्रार्थं पात्रं पुरतो निधाय ॐ—पवित्रेस्थो वैष्णव्यौ०—इति मन्त्रेण

कर्मपात्रार्थं पात्रं पुरतो निधाय ॐ—पवित्रेस्थो वैष्णव्यौ०—इति मन्त्रेण

कर्मपात्रे पवित्रं प्रक्षिप्य—ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तु पीतये । शंय्यो रभिस्रवन्तु नः ॥ इति जलेनाऽऽपूर्य—ॐ यवोसि यवयास्मद् द्वेषो यवया-रातीः ॥ इति यवान् ॥ ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टाङ्करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् । इति गन्धम् । ॐ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण ॥ इति पुष्पं च प्रक्षिप्य अपसव्यं कृत्वा—ॐ कर्मपात्रमहङ्करिष्ये—इति पितृब्राह्मणं पृच्छेत्, ॐ कुरुष्व—इत्यनुज्ञातः सन् पूर्वोक्तप्रकारेण कर्मपात्रं कुर्यात् । यवप्रक्षेप-स्थाने—ॐ तिलोऽसि सोमदैवत्यो गोसवो देवनिर्मितः । प्रत्नमद्भिः पृक्तः स्वधया पितॄन् लोकान् पृणाहि नः स्वाहा ॥ इति तिलान् प्रक्षिपेत् । एतावानेव विशेषः । अन्यत्सर्वं पूर्ववद्विधाय सव्येन कुशत्रयसहितं कर्म-

पात्रोदकमादाय—ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा। यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ ॐ पुण्डरीकाक्षः पुनातु—इत्युक्त्वा श्राद्धदेशं द्रव्याण्तात्मानं च सिञ्चेत्। ततः सङ्कल्पं कुर्यात्—ॐ तत्सत् ३ ॐ विष्णुः ३ अद्य इत्यादि देशकालौ संकीर्त्य अमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां पुरूरवो माद्रवो नाम्नां विश्वेदेवपूर्वकाणामद्यकर्त्तव्य सांवत्सरिकैकपार्वणश्राद्धम् एभिर्द्रव्यैरहं करिष्ये। इति प्रतिज्ञां कृत्वा—ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमो नमः। इति पठित्वा* सप्तव्याधादशार्णेषु मृगाः कालञ्जरे गिरौ। चक्रवाकाः शरद्वीपे हंसाः सरसि मानसे ॥ तेऽपि जाताः कुरुक्षेत्रे

---

* हेमाद्रौ प्रभासखण्डे—आदिमध्यावसानेषु त्रिरावृत्तं जपेद् बुधः।

ब्राह्मणा वेदपारगाः । प्रस्थिता दूरमध्वानं यूयं किमवसीदथ ।। ये विप्रमुख्याः कुरुजाङ्गलेषु जातास्तथा दासकुले मृगाश्च । कालञ्जरे सप्त च चक्रवाका ये मानसे ते वयमत्रसिद्धाः ।। श्राद्धभूमौ गयां ध्यात्वा ध्यात्वा देवं गदाधरम् । ताभ्यां चैव नमस्कृत्य ततः श्राद्धं समारभेत् ।। गया गयो गयादित्यो गायत्री च गदाधरः । गया गयासुरश्चैव षड्गया मुक्तिदायकाः ।। ईशान-विष्णु—कमलासन–कार्तिकेय–वह्नि–त्रयार्क–रजनीश–गणेश्वराणाम् । क्रौञ्चामरेन्द्रकलशोद्भवकश्यपानां पादान्नमामि सततं पितृमुक्तिहेतोः ।। ॐ गयायै नमः । ॐ गदाधराय नमः इति पठित्वा ततोऽपसव्येन दिग्बन्धनं कुर्यात् । तिलसहितमोदकमादाय तिलान् पूर्वादिक्रमेण वक्ष्य-माणमन्त्रैर्विकिरेत् । ॐ अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम् । ओं अपहताऽअसुरा रक्षाᳬसि व्वेदिषदः । यथा बर्हिषदः पान्तु याम्यां मे

पितरः स्थिताः ॥ ओं अप० प्रतीचीमाज्यपास्तद्वत् ॐ अप० उदीचीमपि सोमपाः० ॐ अप० । ॐ रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः । सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ॥—इति सर्वतो विकीर्य पुष्पसहितं मोटकं वामकट्यां धारयेदनेन मन्त्रेण॰—ॐ निहन्मि सर्वं यदमेध्यवद् भवेद् हताश्च सर्वेऽसुरदानवा मया । रक्षांसि यक्षाः सपिशाचगुह्यका हता मया यातुधानाश्च सर्वे । पुनः कुशखण्डत्रयसहिततिलमादाय प्रयान्तु दूरतः सर्वे दैतेया दानवास्तथा ॥ सर्वविघ्नोपशान्त्यर्थं क्षिपामि च कुशाँस्तिलान् ॥ इति दक्षिणस्यां क्षिपेत् । ततः सव्येन विष्णुस्मरणाम् । ॐ नमो नमस्ते गोविन्द पुराण पुरुषोत्तम । इदं श्राद्धं हृषीकेश रक्षतां सर्वतो दिशः ॥ इति रक्षार्थं विष्णुस्मरणम् । अथासनम् । कुशादीन्यादाय—[१] अद्येहामुक-

१. नीवी कार्या दशाङ्गुष्टिर्वामकक्षो कुशैः सह । इति माघे ।

१- नीवी कार्या दशागुप्तिर्वामकुक्षौ कुशैः सह । इति ग्रन्थे ।

गोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिनां विश्वेषां देवानां पुरूरवो माद्रवो नाम्नामद्यकर्त्तव्यसांवत्सरिकैकपार्वणश्राद्धे इदं कौशमासनं वः स्वाहा । ततोऽपसव्यं कृत्वा मोटकमादाय—ॐ अद्येहामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामद्यकर्त्तव्यसांवत्सरिकैकपार्वणश्राद्धे इदं मोटकरूपमासनं त्रेधा विभज्य युष्मभ्यं स्वधा ॥ ततः सव्येनाञ्जलिं बद्ध्वा विश्वान्देवानावाहयेत् । यवाँश्चादाय—ॐ अद्येहामुकगोत्राणामस्मत्पितृ-पितामह-प्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिनो विश्वान्देवान् पुरूरवो माद्रवो नाम्नः अद्यकर्तव्यसांवत्सरिकैकपार्वणश्राद्धे आवाहयिष्ये 'ॐ आवाहय' इत्यनुज्ञाते विश्वेदेवाः० इति मन्त्रं पठित्वा,

ॐ आगच्छन्तु महाभागा विश्वेदेवाः महाबलाः। ये यत्र विहिता श्राद्धे सावधाना भवन्तु मे ॥—इति पठन्नावाहयेत्। ततोऽपसव्येनाञ्जलिं बद्ध्वा पितॄनावाहयेत्। ॐ अद्येहामुकगोत्रान् अस्मत्पितृ-पितामह-प्रपितामहान् अमुकामुकामुकशर्मणः सपत्नीकान् वसुरुद्रादित्यस्वरूपानद्यकर्तव्यसांवत्सरिकैकपार्वणश्राद्धे आवाहयिष्ये 'ॐ आवाहय' इत्यनुज्ञाते उशन्तस्त्वा० इति मन्त्रेणावाह्य, ॐ अपहताऽअसुरा रक्षा ७ं सि व्वेदिषदः ॥ इति मन्त्रेण तिलान् विकीर्य, ॐ आयन्तु न० इति मन्त्रं पठेत्। सव्येन विश्वेदेवब्राह्मणं पृच्छेत् ॐ हस्तार्घपात्रमहं करिष्ये 'ॐ कुरुष्व' इत्यनुज्ञातः सन् पुटकमेकमग्रे कृत्वा ॐ पवित्रेस्थ० इति मन्त्रेण पवित्रं पूर्वाग्रं स्थापयेत्। शन्नोदेवीरिति जलम्। ॐ यवोसीति यवान्। श्रीश्चते इति पुष्पम्। गन्धद्वारामिति गन्धं प्रक्षिप्य-
ॐ हस्तार्घपात्रं सम्पन्नम् इति पृच्छेत्। ॐ सुसम्पन्नम् इत्युक्ते, हस्तार्घ-

ॐ हस्तार्घपात्रं सम्पन्नम् इति पृच्छेत् । ॐ सुसम्पन्नम् इत्युक्ते, हस्तार्घ-

पात्रमुत्थापयामि, ओं उत्थापयस्व इत्यनुज्ञातः सन् हस्तार्घपात्रं वामहस्ते कृत्वा पुष्पसहितं पवित्रं गृहीत्वा 'ओं नमो नारायणाय' इति मन्त्रेण विप्रकरे पुष्पसहितं पूर्वाग्रं पवित्रं धृत्वा दक्षिणकरेण पुटकमुखं पिधाय—ओं या दिव्या आपः पयसा सम्बभूवुर्याऽअन्तरिक्षाऽउतपार्थिवीर्याः ॥ हिरण्यवर्णा यज्ञियास्तानऽआपः शिवाः सꣳ स्योना सुहवा भवन्तु ॥ इति मन्त्रेणार्घ-पात्रस्थं जलमभिमन्त्र्य कुशयवजलान्यादाय—ॐ अद्येहामुकगोत्राणामस्म-त्पितृ-पितामह-प्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रा-दित्यस्वरूपाणां श्राद्धसम्बन्धिनो विश्वेदेवाः पुरूरवो माद्रवो नामानः अद्य-कर्त्तव्यसांवत्सरिकैकपार्वणश्राद्धे एव हस्तार्घो वः स्वाहा । इति ब्राह्मण-करेऽर्घं दद्यात् । अर्घे पुनः प्रत्यर्घमस्तु इति विप्रकरस्थं सपुष्पं पवित्रमर्घ-पात्रे धृत्वा तदर्घपात्रं भूमौ धृत्वा अर्घपात्रस्थजलेन तच्चक्षुरिति चक्षुः—

स्पर्शः कार्यः ॥ ततो विश्वेभ्यो देवेभ्यः स्थानमसीति विश्वेदेवदक्षिणपार्श्वे उत्तानं स्थापयेत्। ततोऽपसव्येन 'ॐ हस्तार्घपात्राण्यहं करिष्ये' इति ब्राह्मणं पृच्छेत्। ॐ कुरुष्व इत्युक्ते पित्रादित्रिभ्यः स्वाऽग्रे पुटकत्रयमासाद्य तेषु--ॐ पवित्रेस्थ इति दक्षिणाग्राणि पवित्राणि धृत्वा—ॐ शन्नोदेवीरिति जलम्, ॐ तिलोसीति तिलान्, ॐ गन्धद्वारामिति गन्धम् , ॐश्रीश्चते० इति पुष्पं प्रक्षिप्य ततः ॐ हस्तार्घपात्राणि सम्पन्नानि इति पितृब्राह्मणं पृच्छेत्, ॐ सुसम्पन्नानि इति प्रत्युक्ते ॐ हस्तार्घपात्राण्युत्थापयामि इति पृच्छेत्, उत्थापयस्वेति प्रयुक्ते प्रथमं पित्रर्घपात्रं वामहस्ते धृत्वा, ॐ नमो नारायणाय इति पितृथीर्थेन विप्रकरे उत्तराऽग्रं पवित्रं धृत्वा अधोमुखेन दक्षिणकरेण हस्तार्घपात्रमुखं पिधाय, ॐ या दिव्या० इति तज्जलमभिमन्त्र्य तिलजलमोटकमादाय, ॐ अद्येहामुकगोत्राऽस्मत्पितरमुकशर्मन् सपत्नीकवसुस्वरूपाद्यकर्तव्यसांवत्सरि-

कैकपार्वणश्राद्धे एष हस्तार्घस्ते स्वधा इति ब्राह्मणकरे अर्घं दद्यात्। अर्घे पुनः प्रत्यर्घमस्तु इति ब्राह्मणकरस्थं पवित्रमर्घपात्रे निधाय तं भूमौ स्थापयेत्। एवं पितामहप्रपितामहाभ्यामपि दत्त्वा ततः प्रपितामहपात्रस्थजलादिकं पितामहार्घपात्रे कृत्वा तदुभयं पित्रर्घपात्रे कृत्वा पुनः पित्रर्घपात्रं पितामहार्घपात्रे कृत्वा तदुभयं प्रपितामहार्घपात्रोपरि धृत्वा सव्यं कृत्वा तत्रस्थजलेन ॐ तच्च[1-2-3] क्षुरिति चक्षुः स्पर्शः। ततोऽपसव्येन पितृद्विजस्य वामभागे ॐ पितृभ्यः स्थानमसीति न्युब्जं कृत्वा तदुपरि कुशात्रयं दद्यात्[4]।

१—आयुष्कामस्य नेत्रसेचनमिति स्कान्दे। २—संश्रवांश्च ततः सर्वान् पत्रे कुर्यात् समाहितः। पितृभ्यः स्थानमसीति न्युब्जपात्रं निधापयेदिति कौर्मे। ३—तस्यैवोपरि कुशान् तत्त्वेति वैजवापः।

४—श्राद्धारम्भे तु ये दर्भा पादशौचे विवर्जयेत्। अर्चनादौ तु ये दर्भा उच्छिष्टान्ते विवर्जयेत्॥
मार्जनादौ तु ये दर्भाः पिण्डोत्थानि विवर्जयेत्। उत्थानान्ते तु ये दर्भा दक्षिणान्ते विवर्जयेत्॥
प्रार्थनादौ तु ये दर्भाः नमस्कारे विसर्जयेत्। इति स्मृत्यन्तरे।

सव्येन 'ॐ अर्चयिष्ये' इति विश्वेदेवब्राह्मणं पृच्छेत् । ॐ अर्चय' इत्युक्ते अत्र[1] गन्ध-पुष्पाक्षत-धूप-दीप-द्रव्य[2] ताम्बूल-यज्ञोपवीत-वस्त्रादिभिरभ्यर्च्य[3] ब्राह्मणाय तिलकं दत्त्वा धूपदीपौ च कारयेत्। ततः कुशादिकमादाय ॐ अद्येहामुकगोत्राणामस्पत्पितृ-पितामह-प्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिनो विश्वेदेवाः पुरूरवो माद्रवो नामान एतान्यर्चनानि अत्र गन्धपुष्पाक्षतधूपदीपनैवेद्यताम्बूलयज्ञोपवीतद्रव्यवासांसि वः स्वाहा ॥ इत्युत्सृजेत् । ततोऽपसव्येन पितृब्राह्मणं पृच्छेत्—'ॐ अर्चयिष्ये' ॐ अर्चय इत्युक्ते गन्धादिभिरभ्यर्च्य ब्राह्मणाय तिलकं दत्त्वा धूपदीपौ च कारयेत्। मोटकादिकमादाय ॐ अद्येहामुकगोत्रा अस्मत्पितृपितामहप्रपितामहा अमुकामुकामुकशर्माणः सपत्नीकाः

१—अत्र नाम जलम । २—ब्राह्मणपूजायां नैवेद्याभावः प्रमाणसाकरे द्रष्टव्यम् । ३—धूपदीपावसाने तु आच्छादनं नियोजयेति हेमाद्रौ कालिकापुराणे ।

वस्त्रं तु आच्छादनं नियोजयेत् हेमाद्रौ कालिकापुराणे।

वसुरुद्रादित्यस्वरूपा एतान्यर्चनानि अत्र गन्धपुष्पाक्षतधूपदीपनैवेद्य-
ताम्बूलयज्ञोपवीतोपायनवासांसि त्रेधा विभज्य युष्मभ्यं स्वधा ॥ इति
उत्सृजेत् । सव्येन विश्वेदेवब्राह्मणहस्ते 'ॐ अर्चनविधेः सर्वं परिपूर्णमस्तु'
इति जलं दद्यात् । अस्त्वित्युक्ते सव्येनैव विश्वेदेवब्राह्मणभोजनस्थाने
चतुर्दिक्षु, यथा चक्रायुधो विष्णुस्त्रैलोक्यं परिरक्षति ॥ एवं मण्डलभस्मै-
तत्सर्वभूतानि रक्षतु । इति मन्त्रेण जलेन आसनसहितं चतुष्कोणं
मण्डलं विधाय अपसव्येन पितृब्राह्मणहस्ते ॐ अर्चनविधेः सर्वं परिपूर्ण-
मस्तु—इति जलं दद्यात् । ॐ अस्तु इति प्रतिवचनम् ॥ पितृब्राह्मण-
भोजनस्थाने चतुर्दिक्षु आसनसहितं चतुष्कोणमण्डलं पूर्वोक्तमन्त्रेण
कुर्यात् ॥ इति ब्राह्मणपूजनम् ॥

अपसव्येनैवाग्नौकरणम्[1] ॥ दक्षिणाभिमुखो भूत्वा वामजानु-

[1]—छन्दोगा जुहुयुः सव्येनापसव्येन याजुषाः ॥ इति वृद्धयाज्ञवल्क्य ॥

पातयित्वा पुटकादौ सघृतमन्नं कृत्वा—ॐ अग्नौकरणमहं करिष्ये इति पितृब्राह्मणं पृच्छेत्। ॐ कुरुष्व, इत्यनुज्ञातः सन् पितृब्राह्मणकरे जलपात्रे वा जुहुयात्। ॐ अग्नये कव्यवाहनाय स्वाहा। इदमग्नये कव्यवाहनाय। इति त्यागः। ॐ सोमाय पितृमते स्वाहा इदं सोमाय पितृमते। हुतशेषमन्नं सव्येन विश्वेदेवपात्रे क्षिपेत्, अपसव्येन पितृब्राह्मणभोजनपात्रे प्रक्षिपेत्।

अथ भूस्वामी[१] तिलघृतमधुजलयुतमन्नं मोटकादिसहितमादाय दक्षिणाभिमुखो भूत्वा—ॐ इदमन्नं सजलमेतत्भूस्वामिपितृभ्यो नमः इत्युत्सृजेत्।

अथान्नसङ्कल्पः—ततः सव्यं कृत्वा विश्वान् देवान् ध्यायन् सोपस्करं

---

१. क्षेत्रपालमसंपूज्य यत्कर्म कुरुते क्वचित्। तस्य कर्मफलं हन्ति क्षेत्रपालो न संशयः। इति प्रयोगसारे

यवजलयुतमन्नमुपनीय मधुनाभिधार्य ऋजुहस्ताभ्यामन्नपात्रमालभ्य–ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽअमृतेऽअमृतं जुहोमि स्वाहा ॥ ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पा ँ सुरे स्वाहा ॥ इति ॥ ॐ कृष्णकव्यमिदं रक्ष मदीयमिति पठित्वा ॐ इदमन्नम्, ॐ इमा आपः, ॐ इदमाज्यम्, ॐ इदं हविः, एतान्युपकरणानि इति क्रमेणान्नजल-घृतेषु विप्रदक्षिणाङ्गुष्ठं निवेश्य, ॐ यवोसीति मन्त्रेण यवान् अन्नस्योपरि विकीर्य कुशयवजलान्यादाय वामहस्ताङ्गुलिभिः क्रमेणान्नमपश्च स्पृष्ट्वा, ॐ अद्येहामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिभ्यो विश्वेभ्यो देवेभ्यः पुरूरवो माद्रवो नामभ्यः अद्यकर्तव्यसांवत्सरिकैकपार्वणश्राद्धे इदमन्नं सजलं सोपस्करं परिविष्टं परिवेक्ष्यमाणं चाक्षय्यतृप्तिहेतोर्वः स्वाहा इति

भूमौ कुशादिकमुत्सृजेत। ततोऽपसव्येन सोपस्करं तिलजलयुतमन्नमुपनीय मधुनाभिघार्य अधोमुखाभ्यां व्यस्ताभ्यां पाणिभ्यामन्नपात्रमालभ्य—ॐ पृथिवीते० इत्यादि जुहोमीत्यन्तम्, ॐ इदं विष्णु रित्यादि सुरे इत्यन्तं पठित्वा, ॐ इदमन्नम्, ॐ इमा आपः, ॐ इदमाज्यम्, ॐ इदं हविः, एतान्युपकरणानि इति क्रमेणान्नजलघृतेषु विप्रदक्षिणाङ्गुष्ठं निवेश्य, ॐ अपहताऽअसुरा रक्षाᳬसि व्वेदिषदः इत्यन्नस्योपरि तिलान् विकीर्य[1] मोटकादीन्यादाय वामहस्ताङ्गुष्ठाङ्गुलिभिः क्रमेणान्नमपश्च स्पृष्ट्वा—ॐ अद्येहामुकगोत्रेभ्यो ऽस्मत्पितृपितामहप्रपितामहेभ्यो ऽमुकामुकामुकशर्मभ्यः सपत्नीकेभ्यो वसुरुद्रादित्यस्वरूपेभ्यः इदमन्नं सजलं सोपस्करं परिविष्टं

१—सर्वदा च तिला ग्राह्याः पितृकृत्ये विशेषतः। भोज्यपात्रे तिलान् दृष्ट्वा निराशाः पितरो गताः॥ इति पृथ्वीचन्द्रोदये पराशरः।

गताः ॥ इति पृथ्वीचन्द्रोदये पराशरः ।

परिवेक्ष्यमाणं चाक्षय्यतृप्तिहेतोस्त्रेधा विभज्य युष्मभ्यं स्वधा इति ब्राह्मणसमीपे भूमौ मोटकादिकमुत्सृजेत् ॥ ततः सव्येन देवब्राह्मणकरयोः 'भवान् प्राशयतु' इत्यपोशानं दत्त्वा अपसव्येन पितृब्राह्मणकरयोः 'भवान् प्राशयतु' इति दत्त्वा सव्येन श्राद्धकर्ता कुशोपरि विशन् ॐ मधुव्वाता इत्यृचं पठेत् ॥ ॐ मधु ३ । अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् । तत्सर्वमच्छिद्रमस्तु भास्करस्य प्रसादतः ॥ ॐ नमस्तुभ्यं विरूपाक्ष नमस्तेऽनेकचक्षुषे । नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ॥ इति पठेत् ।—'यथासुखं जुषध्वम्' इति वचनानन्तरं ते ब्राह्मणा मौनिनो भूत्वा भुञ्जीरन्, हस्तसंज्ञया च भक्ष्यं प्रार्थयेयुः । ततः सव्याहृतिकां गायत्रीं जपित्वा मधुव्वाता० इति ऋचश्च पठित्वा पितृसूक्तं च पठेत् । ब्राह्मणाय यत्र यत्र इच्छोपलभ्यते तत्तत्प्रयच्छन् मन्दं मन्दं भोजयेत् ।

ततः पितामहान्नपात्रसन्निधौ आस्तृतदक्षिणाग्रकुशात्रयायां[1] भूमौ विकिरासनम्। अपसव्येन मोटकादीन्यादाय—असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम्। उच्छिष्टभागधेयानां दर्भेषु विकिरासनम्॥—इति आस्तृतकुशोपरि मोटकमुत्सृजेत्[2]। सतिलघृतमन्नमादाय जलेनाप्लाव्य मोटकञ्चादाय—अग्निदग्धाश्च ये जीवा येऽप्यदग्धा कुले मम। भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम्॥ इति मन्त्रेणास्तृतकुशोपरि तदन्नं विकिरेत्। ततः कुशान् परित्यज्य हस्तौ पादौ प्रक्षाल्य सव्येन द्विराचम्य गायत्रीं जपित्वा मधुव्वाता० इति ऋचां पाठः। ब्राह्मणान् तृप्तान् ज्ञात्वा 'जलगण्डूषमिदं ते' इति विश्वेदेवब्राह्मणाय प्रत्यपोशानं दद्यात्। विश्वेदेव-

---

१-पार्वणे नैर्ऋतौ ज्ञेयं ह्यय याग्नेय एव च। मान्दौ पूर्वं तथा ज्ञेयं प्रेतश्राद्धे तु दक्षिणे। इति भवदेवाः।

२-ततः कुशोदकमापिञ्चेदिति याज्ञवल्क्यस्मृतौ मिताक्षराटीकायाम्।

ब्राह्मणं प्रति प्रश्नः—ॐ तृप्ताःस्थ, ॐतृप्ताः स्म इति प्रतिवचनम्। 'शेषमन्नं किं क्रियताम्' ॐ इष्टैः सह भुज्यतामिति प्रतिवचनम्। अपसव्येन ॐजलगण्डूषमिदं ते इति पितृब्राह्मणाय प्रत्यपोशानं दद्यात्॥ अञ्जलिं बद्ध्वा पितृब्राह्मणं प्रति प्रश्नः 'ॐ तृप्ताः स्थ?' ॐ तृप्ताः स्म इति। 'शेषमन्नं किं क्रियताम्' ॐ इष्टैः सह भुज्यताम्—इति प्रतिवचनम्, ॐ पिण्डदानमहं करिष्ये—इति पृच्छेत्। ॐ कुरुष्व इति प्रतिवचनम्। ततः पिण्डदानार्थं हस्तमितां चतुरङ्गुलोच्छ्रितां सैकतादिकां दक्षिणप्लवां पिण्डिकां निर्माय पिण्डिकामध्ये वामेन पाणिना दर्भपिञ्जुलीं गृहीत्वा दक्षिणहस्ते कृत्वा सव्योपगृहीतदक्षिणपाणिना—ॐ अपहता असुरा रक्षाᳬंसि वेदिषदः इति मन्त्रेण दक्षिणाग्ररेखाद्वयं कृत्वा दर्भपिञ्जुलीमुत्तरस्यां क्षिपेत्। ततो वेदिकायां परितः—ॐ ये रूपाणि प्रतिमुञ्चमाना० इति ज्वलदङ्गारं भ्रामयित्वा दक्षिणस्यां क्षिपेत्।

ततो जलेन शन्नोदेवीरिति मन्त्रेण पिण्डकासेचनं, तदनु छिन्नमूलकुशान् पिण्डिकायां दद्यात्। ततः सव्येन 'देवताभ्य०' इति त्रिः पठेत्। अपसव्यं कृत्वा एकं पुटकं वामहस्ते कृत्वा मोटकमादाय—ॐ अद्येहामुकगोत्रास्मत्पितरमुकशर्मन् सपत्नीक वसुस्वरूपाऽद्य एकपार्वणश्राद्धे पिण्डस्थाने अत्रावने निक्ष्व ते स्वधेति छिन्नमूलकुशोपरि अवनेजनं दद्यात्। एवं पितामहप्रपितामहाभ्यां दद्यात्: ततः पिण्डान् निर्माय मोटकादीनि प्रथमपिण्डं चादाय वामहस्तेन पुटकादिस्थजलमादाय—ॐ अद्येहामुकगोत्रास्मत्पितरमुकशर्मन् वसुस्वरूप अद्य एकपार्वणश्राद्धे एष पिण्डोऽमृतस्वरूपोऽक्षय्यतृप्तिहेतोस्ते स्वधा इति अवनेजनोपरि पिण्डं दद्यात्। एवं पितामहप्रपितामहाभ्यां दद्यात्। तत आस्तृतकुशमूलेन—ॐ लेपभागभुजस्तृप्यन्तु। इति करं प्रोक्ष्य सव्यं कृत्वा द्विराचम्य हरिं स्मरेत्। ततः

ष्यन्तु । इति करं प्रोक्ष्य सव्यं कृत्वा द्विराचम्य हरिं स्मरेत् । ततः

सव्येनैव पुष्पादीन्यादाय पित्रादीनुद्दिश्य—ॐ अत्रपितरो मादयध्वं यमाभागमावृषायिषतइति वामावर्तेन पिण्डिकाया दक्षिणतो गत्वा उत्तराभिमुखो भूत्वा पठेत् । श्वासं नियम्य भास्करमूर्तिपितॄन् ध्यायन् अपसव्यं कृत्वा दक्षिणावर्तेन स्वासने गत्वा दक्षिणाभिमुखो भूत्वा 'ॐ अमीदन्त पितरो यथाभागमावृषायिषत' इति मन्त्रेण पुष्पादिकानि पिण्डेषु निक्षिपेत् । ततोऽवनेजनपात्रं वामहस्ते कृत्वा मोटकमादाय—ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन् अद्य एकपार्वणश्राद्धे इदं पिण्डप्रत्यवनेजनं ते स्वधा इति । एवं पिण्डेषु त्रयेषु प्रत्यवनेजनं दद्यात् । ततो नीवीं विस्रंस्य सव्यं कृत्वाऽऽचम्य हरिं स्मरेत् । ततः अपसव्यं कृत्वा षट्कृत्वो मनसा नमस्कुर्वन् वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय—ॐ नमो वः पितरो रसाय, नमो वः पितरः शोषाय, नमो वः पितरो जीवाय, नमो वः पितरः स्वधायै, नमो वः पितरो घोराय, नमो वः पितरो

मन्न्यवे, नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्तसतो वः पितरो देष्मै तद्वः पितो व्वास आधत्त ।। इति मन्त्रं पठित्वा प्रत्येकं पिण्डोपरि सूत्रं दद्यात्। ततः क्रमेण पिण्डान् गन्धादिभिः संपूज्य धूपदीपौ च कारयेत्। मोटकमादाय ॐ अद्येहामुकगोत्रा अस्मत्पितृपितामहप्रपितामहा अमुकामुकामुकशर्माणः सपत्नीका वसुरुद्रादित्यस्वरूपा अद्य एकपार्वणश्राद्धे एतानि पिण्डार्चनानि अत्र सूत्रगन्धपुष्पाक्षतधूपदीपैक्षवादिनैवेद्यानि त्रेधा विभज्य युष्मभ्यं स्वधा इति गन्धादिकम् उत्सृजेत्। ततः सव्येन विश्वेदेवब्राह्मणकरयोः 'ॐ शिवा आपः सन्तु'–इति जलम्' ॐ सौमनस्यमस्तु–'इति पुष्पम्' 'ॐ अक्षतं चारिष्टमस्तु'–इति तण्डुलान् प्रत्येकं दद्यात्। अपसव्येन पितृब्राह्मण-करयोः–'ॐ शिवा आपः सन्तु'–इति जलम्। 'ॐ सौमनस्यमस्तु'–इति पुष्प-म्। ॐ अक्षतं चारिष्टमस्तु–इति तण्डुलान् प्रत्येकं दद्यात्। सव्येन पूर्वाभि-

मुखो भूत्वाऽञ्जलिं बद्ध्वा, अपां मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितम्। ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवन्तु मे ॥ लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे। लक्ष्मीर्वसति गोष्ठेषु सौमनस्यं ददातु मे ॥ अक्षतं चाऽस्तु मे पुण्यं शान्तिः पुष्टिर्धृतिस्तथा। यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम ॥ ततः कर्मपात्रोदकं कुशैर्गृहीत्वा प्रतिमन्त्रं स्वशिरस्यभिषिञ्चेत् 'ॐ अस्मत्कुले दीर्घमायुरस्तु, ॐ शान्तिरस्तु, ॐ पुष्टिरस्तु, ॐ वृद्धिरस्तु, ॐ यच्छ्रेयस्तदस्तु। ॐ यत्पापं तत्प्रतिहतमस्तु'–इति भूमौ ॥ ॐ द्विपदेचतुष्पदेभ्यः शान्तिर्भवतु। ततोऽपसव्येन पिण्डशेषान्नं पिण्डसमीपे विकिरेत्। गङ्गाजलं वामहस्ते पुटकादौ गृहीत्वा मोटकमादाय–'ॐअद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मण अत्र एकपार्वणश्राद्धे दत्तैतदन्नपानादिकमक्षय्यमस्तु' इति पिण्डेऽक्षय्योदकं दद्यात्। सव्येन कृताञ्जलिर्भूत्वा–'ॐ

अघोराः पितरः सन्तु' इति पिण्डोपरि पूर्वाग्रां जलधारां दद्यात्। सव्येनैव प्राङ्मुखोऽञ्जलिं बद्ध्वाऽऽशिषं प्रार्थयेत्—ॐ गोत्रन्नो वर्द्धताम्। ॐ वर्द्धताम् इति प्रतिवचनम्। ॐ दातारो नोऽभिवर्धन्ताम् ॐ वर्द्धन्ताम् इति प्रतिवचनम्। ॐ वेदाः वर्धन्ताम्। ॐ वर्धन्ताम् इति प्र०। ॐ सन्ततिर्वर्धताम्। ॐ वर्धताम् इति प्रतिवचनम्। ॐ श्रद्धा च नो मा व्यगमत्। ॐ मा गात् इति प्रतिवचनम्। ॐ बहुदेयं च नोऽस्तु। ॐ अस्तु इति प्रतिवचनन्। ॐ अन्नं च नो बहु भवेत्। ॐ भवतु। ॐ अतिथींश्च लभेमहि। ॐ लभध्वम् इति प्रतिवचनम्। ॐ याचितारश्च नः सन्तु। ॐ सन्तु इति प्रतिवचनम्। ॐ मा याचिष्म कञ्चन। ॐ मा याचेथाः। इति प्रतिवचनम्। ॐ एताः सत्या आशिषः सन्तु। ॐ सन्तु। ततः श्राद्धकर्त्ता ब्राह्मणहस्तेन तिलकं कुर्यात्—ॐ यं कामं कामयते सोस्मै कामः समृध्यतामिति-

मन्त्रेण। ततोऽपसव्येन सपवित्रान् कुशान न्युब्जपात्रात् समादाय पिण्डोपरि निक्षिप्य–ॐ स्वधां वाचयिष्ये। ॐ वाच्यतामिति प्रतिवचनानन्तरं रिक्ताञ्जलिना ॐ अद्यामुकगोत्रेभ्यः अस्मत्पितृपितामहप्रपितामहेभ्यः अमुकामुकामुकशर्मभ्यः सपत्नीकेभ्यो वसुरुद्रादित्यस्वरूपेभ्यः अद्य एकपार्वणश्राद्धे ॐ स्वधा उच्यताम्। ॐ अस्तु स्वधा इति प्रतिवचनम्। ततो जलादिसहितं पुटकं वामहस्ते कृत्वा–ॐ ऊर्ज्जं वहन्तीः इति मन्त्रेण सपवित्रकुशोपरि दक्षिणाग्रां जलधारां दद्यात्, तदनु आचारात् पयोधारां च दद्यात्। ततः ॐ पिण्डाः संपन्नाः इति ब्राह्मणं पृच्छेत्, ॐ सुसम्पन्नाः इति प्रतिवचनम्। ॐ पिण्डान्उत्थापयामि, ॐ उत्थापयस्व इत्यनुज्ञातः सन्

नम्रीभूय पिण्डानुत्थापयेत्[१] पिण्डाधारकुशानुल्मुकं च वह्नौ क्षिपेत्-सव्येन नम्रीभूय पिण्डानाघ्राय सव्येनैव पिण्डिकायां शङ्खं चक्रं च लिखेत्। ॐ शङ्खाय नमः, ॐ चक्राय नमः। इति यवैः शङ्खचक्रपूजां विधाय अपसव्यं कृत्वा ॐ गयायां पितृरूपेण स्वयमेव जनार्दनः। तं दृष्ट्वा पुण्डरीकाक्षमुच्यते च ऋणत्रयात्॥ इति मन्त्रेण पिण्डं पिण्डकोपरि निधाय एभिर्मन्त्रैः पूजयेत्। सव्येन—ॐ वसन्ताय नमस्तुभ्यं ग्रीष्माय च नमो नमः। वर्षाभ्यश्च शरत्संज्ञ ऋतवे च नमो नमः॥ हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च। माससंवत्सरेभ्यश्च दिवसेभ्यो नमो नमः॥ सव्येनैव विश्वेदेवार्घपात्रं संचाल्य अपसव्येन पित्रर्घपात्राण्युत्तानीकृत्य सव्येन दक्षिणां

---

१. अत्रैव वसन्ताद् ऋतुपूजनं युक्तम् अथवा वसन्तादिपूजनानन्तरमाह्वानं युक्तं अन्यथोच्छिष्टे पूजनमनुचितमेवाहुः, श्राद्धचिन्तामणिकारादयः।

पूजनमनुचितमवाहुः, श्राद्धचिन्तामणिकारादयः।

दद्यात्। कुशयवजलदक्षिणाद्रव्याण्यादाय—ॐ अद्यामुकगोत्राणामस्मत्पितृ-पितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरू-पाणां पुरूरवो माद्रवो नाम्नामद्य कृतैतदेकपार्वणश्राद्धे वैश्वदैविकश्राद्ध-प्रतिष्ठासिद्ध्यर्थं दक्षिणां हिरण्यमग्निदैवतं तन्मूल्योपकल्पितं द्रव्यं वा यथा दैवतं अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे। इति ब्राह्मण-करे उत्सृजेत्। सव्येनैव कुशतिलजलदक्षिणाद्रव्यमादाय—ॐ अद्यामुकगो-त्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां कृतैतत्सांवत्सरिकैकपार्वणाश्राद्धप्रतिष्ठासिद्ध्यर्थं दक्षिणां रजतं चन्द्रदैवतं तन्मूल्योपकल्पितं द्रव्यं यथादैवतं यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे इति उत्सृजेत्। पुनर्भूयसी-दक्षिणाद्रव्यमादाय—ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहा-

नाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां विश्वेदेवपूर्वकाणां कृतैतत्सांवत्सरिकैकपार्वणश्राद्धप्रतिष्ठार्थं न्यूनातिरिक्तपरिपूर्णार्थं यद्देयमन्नपानादिकं द्रव्यं यथानामदैवतं नाना नामगोत्रेभ्यो ब्राह्मणेभ्यः कन्याकुमारेभ्यो ब्राह्मणीभ्यश्च यथाभागं विभज्य यथाकालं दातुमहमुत्सृजे। अपसव्येन—ॐ वाजे वाजे० इति पित्रादीन् विसर्जयेत् ॥ ॐ आमावाजस्य० इति पठेत्। ततः सव्येन ॐ पुरूरवो माद्रवो नामानो विश्वेदेवाः प्रीयन्तामिति विश्वेदेवविसर्जनं कुर्यात्। ततो देवताभ्यः० इति त्रिः पठेत् ॥ अपसव्येन दीपाच्छादनं विधाय सव्येन हस्तौ पादौ प्रक्षाल्याऽऽचम्य ॐ यत्कृतं तत्सुकृतमस्तु, यन्न कृतं तद्विष्णोः प्रसादाद् ब्राह्मणवचनात् सर्वं परिपूर्णमस्तु ॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च। स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥ आयुः प्रजां धनं विद्यां स्वर्ग-मोक्ष-सुखानि

च ॥ प्रयच्छन्तु तथा राज्यं पितरः श्राद्धतर्पिताः ॥ कायेन वाचा०, यस्य-स्मृत्या०, चतुर्भिश्च० इत्यादि पठित्वा 'ॐ अच्युताय नमः ३' इति पठेत् ॥

॥ इति एकपार्वणश्राद्धविधिः समाप्तः ॥

—: ❀ :—

श्राद्धमा चाहिने केही सामग्री ।

दीयो, बत्ती, तेल, तर्पणको सामग्री, दीयो राख्ने चामल, चन्दन, केशरी, अक्षता, तिल, जौ, फूल, धूप, बत्ती, कपूर, पक्वान्न, नैवेद्य, पान, मसाला, पान (सादा), टपरी, बोहोता, दुना, चारकुने, आसनी, पञ्चपात्र, कर्मपात्र, दही, दूध, घिउ, मह, चीनी, मालभोग केरा,

सुपारी, शुद्ध जनै, वस्त्र, सूत्र, कुशका ब्राह्मण, कुशमोटक प्रशस्त, पवित्र, ब्राह्मण थाप्ने चामल, औंठी ३, पिण्ड पकाउने चामल, दाउरा, कसौंड़ी, चूह्ली, अर्घ, खगौतो, बालुवा, विष्णुपादुका, सिधा, गङ्गाजल चोखो पानी, श्राद्धकर्तालें लाउने धोती, उपर्ना, जनै, गोदान, दानप्रतिष्ठा, भेटी, दक्षिणा, मासका बारा (फुरौला), ब्राह्मण-भोजन; सक्नेले शय्यादान, पितृसूक्तपाठ ॥ इत्यादि ॥

—: ❀ :—

हरिः ॐ अग्नयेकव्यवाहनायस्वाहा सोमायपितृमतेस्वाहा ॥ अपहता-ऽअसुरा रक्षाᳪंसिवेदिषदः ॥१॥ येरूपाणिप्रतिमुञ्चमानाऽअसुराः सन्तः स्वधयाचरन्ति ॥ परापुरोनिपुरोयेभरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात् ॥२॥ अत्रपितरोमादयध्वंयथाभागमावृषायध्वम् ॥ अमीमदन्तपितरो यथा भागमा-वृषायिषत ॥३॥ नमोवः पितरोरसायनमोवः पितरः शोषायनमोवः पितरोजी-वायनमोवः पितरः स्वधायै नमोवः पितरोघोरायनमोवः पितरो मन्यवेनमोवः पितरः पितरोनमोवो गृहान्न ः पितरोदत्तसतोव ः पितरोदेष्मैतद्व ः पितरोवास ॥ ४ ॥ आधत्तपितरोगर्भङ्कुमारम्पुष्करस्रजम् ॥ यथेहपुरुषो-सत् ॥ ५ ॥ ऊर्ज्जंवहन्तीरमृतङ्घृतम्पय ः कीलालम्परिस्रुतम् ॥ स्वधा-स्थतर्पयतमेपितॄन् ॥ ६ ॥

हरिः ॐ कृणुष्वपाजः प्रसितिन्नपृत्थ्वींयाहिराजेवामवाँ२ऽ इभेन ॥ तृष्वीमनुप्रसितिन्द्रूणानोस्तासिविध्यरक्षसस्तपिष्ठैः ॥१॥ तवभ्रमासऽआशुया-पतन्त्यनुस्पृशधृषताशोशुचानः ॥ तपूंष्यग्नेजुह्वापतङ्गानसन्दितोविसृजविष्व गुल्कका: ॥ २ ॥ प्रतिस्पशोविसृजतूर्णितमोभवापायुर्विशोऽअस्याऽअदब्धः ॥ योनोदूरेऽअघशꣳसोयो ऽन्त्यग्नेमाकिष्टेव्यथिरादधर्षीत् ॥ ३ ॥ उदग्नेतिष्ठ-प्रत्यातनुष्वन्यमित्राँ२ऽओषतात्तिग्महेते ॥ योनोऽअरातिꣳसमिधा नचक्रेनी-चातन्धक्ष्यतसन्नशुष्कम् ॥ ४ ॥ ऊर्ध्वोभवप्रतिविद्ध्याध्यस्मदाविष्कृणुष्वदैव्या-न्यग्ने ॥ अवस्थिरातनुहियातुजूनाञ्जामिमजामिम्प्रमृणीहिशत्रून् ॥ ५ ॥

हरिः ॐतदेवाग्निस्तदादित्यस्तद्वायुस्तदुचन्द्रमाः ॥ तदेव शुक्रन्त-द्ब्रह्मताऽआपः सप्रजापतिः ॥ १ ॥ सर्वेनिमेषाजज्ञिरेविद्युतः परुषादधि ॥ नैनमूर्द्ध्वन्नतिर्य्यञ्चन्नमद्ध्येपरिजग्रभत् ॥ २ ॥ नतस्यप्प्रतिमाऽअस्तियस्य-

नाममहद्यशः ॥ हिरण्यगर्भऽइत्येषमामाहिꣳ सीदित्येषायस्मान्नजातऽ-
इत्येषः ॥ ३ ॥ एषोहदेवः प्रदिशोनुसर्वाः पूर्वोहजातः सऽउगर्भेऽअन्तः ॥
सऽएवजातः सजनिष्यमाणः प्प्रत्यङ्जनास्तिष्ठतिसर्वतोमुखः ॥ ४ ॥ यस्मा-
ज्जातन्नपुराकिञ्चनैवयऽआबभूवभुवनानिविश्वा ॥ प्रजापतिः प्प्रजयासꣳ
रराणस्त्रीणिज्योतीꣳषिसचतेसषोडशी ॥५॥ येनद्यौरुग्ग्रापृथिवी च दृढायेन
स्वस्तभितꣳयेननाकः ॥ योऽअन्तरिक्षेरजसोविमानः कस्मैदेवायहविषा-
विधेम ॥ ६ ॥ यङ्क्रन्दसीऽअवसातस्तभानेऽअभ्यैक्षेताम्मनसारेजमाने ॥
यत्राधिसूरऽउदितोविभातिकस्मैदेवायहविषाविधेम ॥ आपोहयद्बृहतीर्य्यश्चिच
दापः ॥ ७ ॥ वेनस्तत्पश्यन्निहितङ्गुहासद्यत्रविश्वम्भवत्येकनीडम् ॥
तस्मिन्निदꣳ सञ्चविचैतिसर्वꣳसऽओतः प्रोतश्चविभूः प्प्रजासु ॥ ८ ॥
प्रतद्वोचेदमृतन्नुविद्वान्गन्धर्वोधामविभृतङ्गुहासत् ॥ त्रीणिपदानिनिहिता-

गुहायस्यस्तानिवेदसपितुः पितासत् ॥ ८ ॥ सनोबन्धुर्ज्जनितासविधाता-
धामानिवेदभुवनानिविश्वा ॥ यत्रदेवाऽअमृतमानशानास्तृतीयेधामन्नध्यै-
रयन्त ॥ १० ॥ परीत्यभूतानिपरीत्यलोकान्परीत्यसर्वाः प्रदिशोदिशश्च ॥
उपस्थायप्रथमजामृतस्यात्मनात्मानमभिसंविवेश ॥ ११ ॥ परिद्यावापृथिवी
सद्यऽइत्वापरिलोकान्परिदिशः परिस्वः ॥ ऋतस्यतन्तुं विततंविचृत्यतद-
पश्यत्तदभवत्तदासीत् ॥ १२ ॥ सदसस्पतिमद्भुतम्प्रियमिन्द्रस्यकाम्यम् ॥
सनिम्मेधामयासिषᳬस्वाहा ॥ १३ ॥ याम्मेधान्देवगणाः पितरश्चोपासते ॥
तयामामद्यमेधयाग्नेमेधाविनङ्कुरुस्वाहा॥१४॥ मेधाम्मेवरुणोददातुमेधामग्निः
प्रजापतिः ॥ मेधामिन्द्रश्चवायुश्चमेधान्धाताददातुमेस्वाहा ॥१५॥ इदम्मे-
ब्रह्मचक्षत्रञ्चोभेश्रियमश्नुताम्॥ मयिदेवादधतुश्रियमुत्तमान्तस्यैते स्वाहा॥१६॥

हरिः ॐ सुरावन्तम्बर्हिषदᳬसुवीरंयज्ञᳬ हिन्वन्तिमहिषानमोभिः ॥

दधानाः सोमन्दिविदेवतासुमदेमेन्द्रंयजमानाः स्वर्क्काः ॥ १ ॥ यस्तेरसः
सम्भृतऽओषधीषुसोमस्यशुष्म ÷ सुरया सुतस्य ॥ तेनजिन्वयजमानम्मदेन
सरस्वतीमश्विनाविन्द्रमग्निम् ॥ २ ॥ यमश्विनानमुचेरासुरादधिसरस्वत्य-
सुनोदिन्द्रियाय ॥ इमन्तꣳ शुक्रम्मधुमन्तमिन्दुꣳसोमꣳराजानमिहभक्षयामि
॥३॥ यदत्ररिप्तꣳरसिन ÷ सुतस्ययदिन्द्रोऽअपिवच्छचीभि ÷ ॥ अहन्तदस्य-
मनसाशिवेनसोमꣳ राजानमिहभक्षयामि ॥ ४ ॥ पितृभ्य ÷ स्वधायिभ्य ÷
स्वधानम ÷ पितामहेभ्य ÷ स्वधायिभ्य ÷ स्वधानम ÷ प्रपितामहेभ्य ÷ स्वधायि-
भ्य ÷ स्वधानम ÷ ॥ अक्षन्पितरोमीमदन्तपितरोतीतृपन्तपितर ÷ पितरःशुन्ध-
ध्वम् ॥ ५ ॥ पुनन्तुमापितर ÷ सोम्यास ÷ पुनन्तुमापितामहाः पुनन्तु-
प्रपितामहाः पवित्रेणशतायुषा ॥ पुनन्तुमापितामहाः पुनन्तुप्रपितामहाः ॥
पवित्रेणशतायुषाविश्वमायुर्व्यश्नवै ॥ ६ ॥ अग्नऽआयूꣳषिपवसऽआसुवोर्ज्ज-

भिषक्तनः आरेबाधस्वदुच्छुनाम् ॥ ७ ॥ पुनन्तुमादेवजनाः पुनन्तुमनसा-
धियः ॥ पुनन्तुविश्वाभूतानिजातवेदः पुनीहिमा ॥ ८ ॥ पवित्रेणपुनीहि-
माशुक्रेणदेवदीद्यत् ॥ अग्नेक्रत्वाक्रतूँ२ऽरनु ॥ ९ ॥ यत्तेपवित्रमर्चिष्यग्ने-
विततमन्तरा ॥ ब्रह्मतेनपुनातुमा ॥ १० ॥ पवमानःसोऽअद्यनः पवित्रेण-
विचर्षणिः॥ यः पोतासपुनातुमा ॥ ११ ॥ उभाभ्यान्देवसवितः पवित्रेण
सवेनच ॥ माम्पुनीहिविश्वतः ॥ १२ ॥ वैश्वदेवीपुनतीदेव्यागाद्यस्यामि
माबह्व्यस्तन्वोवीतपृष्ठाः ॥ तयामदन्तः सधमादेषुवयꣳस्यामपतयोरयी-
णाम् ॥ १३ ॥ येसमानाः समनसः पितरोयमराज्ये ॥ तेषाँल्लोकः स्व-
धयानमोयज्ञोदेवेषुकल्पताम् ॥ १४ ॥ येसमानाः समनसोजीवाजीवेषुमा
मकाः ॥ तेषाꣳश्रीर्मयिकल्पतामस्मिँल्लोकेशतꣳसमाः ॥ १५ ॥ द्वेसृतीऽ-
अशृणवम्पितृणामहन्देवानामुतमर्त्यानाम् ॥ ताभ्यामिदं विश्वमेजत्समेति-

यदन्तरापितरम्मातरञ्च ॥ १६ ॥ इदꣳ हविःप्रजननम्मेऽअस्तुदशवीरꣳ
सर्वगणꣳस्वस्तये ॥ आत्मसनिप्रजासनिपशुसनिलोकसन्न्यभयसनि ॥
अग्निः प्रजाम्बहुलाम्मेकरोत्वन्नम्पयोरेतोऽअस्मासुधत्त ॥ १७ ॥ उदीरता
मवरऽउत्परासऽउन्मद्ध्यमाः पितरः सोम्यासः ॥ असुंऽयऽईयुरवृकाऽ
ऋतज्ञास्तेनोवन्तुपितरोहवेषु ॥ १८ ॥ अङ्गिरसोनः पितरोनवग्वाऽअथ
र्वाणोभृगवः सोम्यासः ॥ तेषांवयꣳसुमतौयज्ञियानामपिभद्रेसौमनसेस्याम
॥१९॥ येनः पूर्वेपितरः सोम्यासोनूहिरेसोमपीथं वसिष्ठाः ॥ तेभिर्यमः
सꣳरराणोहवीꣳष्युशन्नुशद्भिः प्रतिकाममत्तु ॥ २० ॥ त्वꣳसोमप्रचिकितो-
मनीषात्वꣳरजिष्ठमनुनेषिपन्थाम् ॥ तवप्रणीतीपितरोनऽइन्दोदेवेषुरत्नमभ-
जन्तधीराः ॥ २१ ॥ त्वयाहिनः पितरः सोमपूर्वेकर्माणिचक्रुः पवमान-
धीराः ॥ वन्वन्नवातः परिधींऽरपोर्णुवीरेभिरश्वैर्म्मघवाभवानः ॥ २२ ॥

त्वꣳसोमपितृभिः संविदानोनुद्यावापृथिवी ऽआततन्थ ॥ तस्मैतऽइन्दो-
हविषा विधेमवयꣳस्यामपतयोरयीणाम् ॥ २३ ॥ बर्हिषदः पितरऽऊत्यर्वा-
गिमावोहव्याचकृमा जुषद्ध्वम् ॥ तऽआगतावसाशन्तमेनाथानः शंय्योरर
पोदधात ॥ २४ ॥ आहम्पितन्त्सुविदत्राँ२ऽआवित्सिनपातञ्चविक्रमणञ्च-
विष्णोः ॥ बर्हिषदोयेस्वधयासुतस्यभजन्तपित्वस्तऽइहागमिष्ठाः ॥ २५ ॥
उपहूताः पितरः सोम्यासोबर्हिष्येषुनिधिषुप्प्रियेषु ॥ तऽआगमन्तुतऽइह-
श्रुवन्त्वधिब्रुवन्तुतेवन्त्वस्मान् ॥ २६ ॥ आयन्तुनः पितरः सोम्यासोग्नि-
ष्वात्ताः पथिभिर्देवयानैः ॥ अस्मिन्यज्ञेस्वधयामदन्तोधिब्रुवन्तुतेवन्त्वस्मान्
॥ २७ ॥ अग्निष्वात्ताः पितरऽएहगच्छतसदः सदः सदतसुप्रणीतयः ॥
अत्ताहवीꣳषिप्प्रयतानिबर्हिष्यथारयिꣳसर्ववीरन्दधातन ॥ २८ ॥ येऽअग्नि
ष्वात्तायेऽअनग्निष्वात्तामद्ध्येदिवः स्वधयामादयन्ते ॥ तेभ्यः स्वराडसुनी-

तिमेताँ३थथावशन्तन्वङ्कल्पयाति ॥ २९ ॥ अग्निष्वात्तानृतुमतोहवामहे-
नाराशꣳसेसोमपीथँ३थ ऽआशुः ॥ तेनोविप्रासः सुहवाभवन्तुवयꣳस्याम-
पतयोरयीणाम् ॥३०॥ आच्याजानुदक्षिणतोनिषद्येमँ३थज्ञमभिगृणीतविश्वे ॥
माहिꣳसिष्टपितरः केनचिन्नोयद्व ऽआग ÷ पुरुषताकराम ॥ ३१ ॥ आसीना-
सो ऽअरुणीनामुपस्थेरयिन्धत्तदाशुषेमर्त्याय ॥ पुत्रेभ्य ÷ पितरस्तस्यवस्वः
प्रयच्छतत ऽइहोर्ज्जन्दधात ॥ ३२ ॥ थमग्नेकव्यवाहनत्वंचिन्मन्यसेरयिम् ॥
तन्नोगीर्भिः श्रवाय्यन्देवत्रापनयायुजम् ॥ ३३ ॥ थो ऽअग्निः कव्यवाहनः
पितन्यक्षदृतावृध ÷ ॥ प्रेदुहव्यानिवोचतिदेवेभ्यश्चपितृभ्य ऽआ ॥ ३४ ॥
त्वमग्न ऽईडितः कव्यवाहनावाढ्ढव्यानिसुरभीणिकृत्वी ॥ प्रादाः पितृभ्य÷
स्वधयाते ऽअक्षन्नद्धित्वन्देवप्रयताहवीꣳषि ॥ ३५ ॥ थेचेहपितरोथेचने-
हथाँश्चविद्मथाँ२ ऽउचनप्रविद्म ॥ त्वंवेत्थथतितेजातवेदः स्वधाभिर्थज्ञꣳसु-

कृतञ्जुषस्व ॥ ३६ ॥ इदम्पितृभ्योनमोऽअस्त्वद्ययेपूर्वासोयऽउपरासऽईयुः ॥
येपार्थिवेरजस्यानिषत्तायेवानूनꣳसुवृजनासुविक्षु ॥ ३७ ॥ अधायथानः
पितरः परासः प्रत्नासोऽअग्नऽऋतमाशुषाणाः ॥ शुचीदयन्दीधिति-
मुक्थशासः क्षामाभिन्दन्तोऽअरुणीरपव्रन् ॥ ३८ ॥ उशन्तस्त्वानिधीमह्यु-
शन्तः समिधीमहि ॥ उशन्नुशतऽआवहपितॄन्हविषेऽअत्तवे ॥ ३९ ॥

हरिः ॐ सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात् ॥ सभूमिꣳसर्वत-
स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुषऽएवेदꣳसर्व्वंयद्भूतंयच्चभाव्यम् ॥
उतामृतत्वस्येशानोयदन्नेनातिरोहति ॥ २ ॥ एतावानस्यमहिमातोज्यायाँश्च-
पुरुषः ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि ॥ ३ ॥ त्रिपादूर्ध्वऽ-
उदैत्पुरुषः पादोस्येहाभवत्पुनः ॥ ततोविष्वङ्व्यक्रामत्साशनानशनेऽ-
अभि ॥ ४ ॥ ततोविराडजायतविराजोऽअधिपूरुषः ॥ सजातोऽअत्य-

रिच्यतपश्चाद्भूमिमथोपुरः ।। ५ ।। तस्माद्यज्ञात्सर्वहुतः सम्भृतम्पृषदाज्यम् ।।
पशूँस्ताँश्चक्रेवायव्यानारण्ण्याग्ग्राम्म्याश्चये ।।६।। तस्माद्यज्ञासत्सर्वहुतऽऋचः
सामानियज्ञिरे ।। छन्दाꣳसिजज्ञिरेतस्माद्यजुस्तस्म्मादजायत ।। ७ ।।
तस्मादश्वाऽअजायन्तयेकेचोभयादतः ।। गावोहजज्ञिरेतस्मात्तस्माज्जाताऽ-
अजावयः ।। ८ ।। तंयज्ञम्बर्हिषिप्प्रौक्षन्पुरुषञ्जातमग्रतः ।। तेनदेवाऽ-
अयजन्तसाद्ध्याऽऋषयश्चये ।। ९ ।। यत्पुरुषम्व्यदधुः कतिधाव्यकल्पयन् ।।
मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्येते ।। १० ।। ब्राह्मणोस्यमुखमा-
सीद्बाहूराजन्यः कृतः ।। ऊरूतदस्ययद्वैश्यःपद्भ्याꣳशूद्रोऽअजायत ।। ११ ।।
चन्द्रमामनसोजातश्चक्षोः सूर्य्योऽअजायत ।। श्रोत्राद्वायुश्चप्राणश्चमुखा-
दग्निरजायत ।। १२ ।। नाभ्याऽआसीदन्तरिक्षꣳशीर्ष्णोद्यौः समवर्त्तत ।।
पद्भ्याम्भूमिर्दिशः श्रोत्रात्तथालोकाँ२ऽअकल्पयन् ।। १३ ।। यत्पुरुषेण-

हविषादेवायज्ञमतन्वत ॥ वसन्तोस्यासीदाज्यङ्ग्रीष्मऽइध्मः शरद्धविः ॥१४॥
सप्तास्यासन्परिधयस्त्रिः सप्तसमिध ÷ कृताः ॥ देवायद्यज्ञन्तन्वानाऽअबध्न-
न्पुरुषम्पशुम् ॥ १५ ॥ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्यासन् ॥
तेहनाकम्महिमान ÷ सचन्तयत्रपूर्वेसाध्याः सन्तिदेवा ॥ १६ ॥

हरिः ॐ नमस्तेरुद्रमन्न्यवऽउतोतऽइषवेनम ÷ ॥ बाहुभ्यामुतते-
नम ÷ ॥ १ ॥ यातेरुद्रशिवातनूरघोरापापकाशिनि ॥ तयानस्तन्न्वा-
शन्तमयागिरिशन्ताभिचाकशीहि ॥ २ ॥ यामिषुङ्गिरिशन्तहस्तेबिभर्ष्य-
स्तवे ॥ शिवाङ्गिरित्रताङ्कुरुमाहिꣳसीः पुरुषञ्जगत् ॥ ३ ॥ शिवेनवच-
सात्त्वागिरिशाच्छावदामसि ॥ यथानः सर्वमिज्जगदयक्ष्मꣳसुमनाऽअसत्
॥ ४ ॥ अद्ध्यवोचदधिवक्ताप्रथमोदैव्योभिषक् ॥ अहींश्चसर्वाञ्जम्भयन्त्सर्वा-
श्चयातुधान्योधराचीः परासुव ॥ ५ ॥ असौयस्ताम्म्रोऽअरुणऽउतबभ्रुः

सुमङ्गल ÷ ॥ येचैनꣳरुद्राऽअभितोदिक्षुश्रिताः सहस्रशोवैषाꣳहेडऽईमहे
॥ ६ ॥ असौयोवसर्प्पतिनीलग्ग्रीवोविलोहितः ॥ उतैनङ्गोपाऽअदृश्रन्न-
दृश्रन्नुदहार्य्यः सदृष्टोमृडयातिनः ॥ ७ ॥ नमोस्तुनीलग्ग्रीवायसहस्राक्षाय-
मीढुषे ॥ अथोयेऽअस्यसत्वानोहन्तेभ्योकरन्नम ÷ ॥ ८ ॥ प्रमुञ्चधन्न्वन-
स्त्वमुभयोरात्न्योर्ज्याम् ॥ याश्चतेहस्तऽइषवः परातभगवोवप ॥ ९ ॥
विज्यन्धनु ÷ कपर्द्दिनोविशल्योबाणवाँ२ऽउत ॥ अनेशन्नस्ययाऽइषवऽआभु-
रस्यनिषङ्गधिः ॥ १० ॥ यातेहेतिम्मीढुष्टमहस्तेबभूवतेधनु ÷ ॥ तयास्म्मा-
न्विश्वतस्त्वमयक्ष्मयापरिभुज ॥ ११ ॥ परितेधन्न्वनोहेतिरस्मान्वृणक्तु-
विश्वत÷ ॥ अथोयऽइषुधिस्तवारेऽअस्मन्निधेहितम ॥ १२ ॥ अवतत्य-
धनुष्ट्वꣳसहस्राक्षशतेषुधे ॥ निशीर्य्यशल्यानाम्मुखाशिवोन÷सुमनाभव ॥ १३ ॥
नमस्तऽआयुधायानाततायधृष्णवे ॥ उभाभ्यामुततेनमोबाहुभ्यान्तवधन्न्वने

॥ १४ ॥ मानोमहान्तमुतमानोऽअर्भकम्मानऽउक्षन्तमुतमानऽउक्षितम् ॥
मानोवधीः पितरम्मोतमातरम्मानः प्रियास्तन्न्वोरुद्ररीरिषः ॥ १५ ॥ मानस्तो-
केतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः ॥ मानोवीरान्रुद्रभामिनो-
वधीर्हविष्मन्तःसदमित्वाहवामहे ॥ १६ ॥ नमोहिरण्यबाहवेसेनान्येदिशाञ्चप-
तयेनमोनमोवृक्षेभ्योहरिकेशेभ्यःपशूनाम्पतयेनमोनमः शष्पिञ्जरायत्त्विषीमते-
पथीनाम्पतये नमोनमो हरिकेशायोपवीतिनेपुष्टानाम्पतयेनमोनमो ॥ १७ ॥
बभ्लुशायव्याधिनेनानाम्पतयेनमोनमोभवस्यहेत्यैजगताम्पतयेनमोनमो रुद्रा-
याततायिनेक्षेत्राणाम्पतयेनमोनमःसूतायाहन्त्यैवनानाम्पतयेनमो ॥ १८ ॥
नमोरोहितायस्थपतये वृक्षाणाम्पतये नमोनमोभुवन्तयेवारिवस्कृतायौषधी-
नाम्पतये नमोनमो मन्त्रिणेवाणिजायकक्षाणाम्पतये नमोनमोऽउच्चैर्घोषाया-
क्रन्दयत्तेपत्तीनाम्पतये नमो ॥ १९ ॥ नमःकृत्स्नायतया धावतेसत्त्व-

नाम्पतये नमोनमः सहमानायनिव्याधिनऽआव्याधिनीनाम्पतये नमोनमो-
निषङ्गिणे ककुभायस्तेनानाम्पतये नमोनमोनिचेरवेपरिचरायारण्य नाम्प-
तयेनमो ॥ २० ॥ नमोवञ्चते परिवञ्चतेस्तायूनाम्पतयेनमोनमोनिषङ्गिण-
ऽइषुधिमतेतस्कराणाम्पतयेनमोनम ÷ सृकायिभ्योजिघाᳪंसद्भ्योमुष्ण-
ताम्पतये नमोनमोसिमद्भ्योनक्तञ्चरद्भ्योविकृन्तानाम्पतये नमः ॥ २१ ॥
नमऽउष्णीषिणेगिरिचरायकुलुञ्चानाम्पतयेनमोनमऽइषुमद्भ्योधन्वायिभ्यश्च-
वोनमोनमऽआतन्वानेभ्य÷प्रतिदधानेभ्यश्चवोनमोनमऽआयच्छद्भ्योस्य-
द्भ्यश्चवोनमो ॥ २२ ॥ नमोविसृजद्भ्यो विध्यद्भ्यश्चवोनमोनम÷स्वपद्भ्यो-
जाग्रद्भ्यश्चवोनमोनमः शयानेभ्य आसीनेभ्यश्चवोनमोनमस्तिष्ठद्भ्योधाव-
द्भ्यश्चवोनमो ॥ २३ ॥ नम÷सभाभ्य÷सभापतिभ्यश्चवोनमोनमोश्वेभ्यो-
श्वपतिभ्यश्चवोनमोनमऽआव्याधिनीभ्योविविद्ध्यन्तीभ्यश्चवो नमोनमऽ

उगणाभ्यस्तृꣳहतीभ्यश्चवोनमो ॥ २४ ॥ नमोगणेभ्यो गणपतिभ्यश्च-
वोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवोनमोनमोगृत्सेभ्यो गृत्सपतिभ्यश्चवो-
नमोनमोविरूपेभ्योविश्वरूपेभ्यश्चवोनमो ॥ २५ ॥ नमः सेनाभ्यः꞉सेना-
निभ्यश्चवोनमोनमोरथिभ्योऽअरथेभ्यश्चवोनमोनम꞉क्षतृभ्य꞉ सग्रहीतृ-
भ्यश्चवोनमोनमोमहद्भ्योऽअर्भकेभ्यश्चवोनमः ॥ २६ ॥ नमस्तक्षभ्योर-
थकारेभ्यश्चवोनमोनमः कुलालेभ्यः कर्म्मारेभ्यश्चवोनमोनमोनिषादेभ्य꞉
पुञ्जिष्ठेभ्यश्चवोनमोनम꞉श्वनिभ्योमृगयुभ्यश्चवोनमो ॥२७॥ नमः श्वभ्यः
श्वपतिभ्यश्चवोनमोनमोभवायचरुद्रायचनम꞉ शर्वायचपशुपतयेचनमोनील-
ग्ग्रीवायचशितिकण्ठायचनम꞉॥ २८ ॥ कपर्द्दिनेचव्युप्तकेशायचनमः सहस्रा-
क्षायचशतधन्न्वनेचनमोगिरिशयायचशिपिविष्टायचनमो मीढुष्टमायचेषुमते
च ॥ २९ ॥ नमोह्रस्वायचवामनायचनमोबृहतेचव्वर्षीयसेचनमोवृद्धायचस-

वृधेचनमोग्न्यायचप्रथमायच ॥ ३० ॥ नमऽआशवेचाजिरायचनमः शीघ्र्याय-
यचशीभ्यायचनमऽऊर्म्यायचावस्वन्यायचनमोनादेयायचद्वीप्यायच ॥ ३१ ॥
नमोज्येष्ठायचकनिष्ठायचनमः पूर्वजायचापरजायचनमोमध्यमायचापगल्भा-
यचनमोजघन्यायचबुध्न्यायचनमः ॥ ३२ ॥ सोभ्यायऽचप्रतिसर्य्यायचनमो-
याम्यायचक्षेम्यायचनमः श्लोक्यायचावसान्यायचनमऽउर्वर्य्यायचखल्यायच
॥ ३३ ॥ नमोवन्यायचकक्ष्यायचनमः श्रवायचप्रतिश्रवायचनमऽआशुषेणा-
यचाशुरथायचनमः शूरायचावभेदिनेच ॥ ३४ ॥ नमोबिल्मिनेचकवचिनेच-
नमोवर्मिणेचवरूथिनेचनमः श्रुतायचश्रुतसेनायचनमोदुन्दुभ्यायचाहनन्या-
यच ॥ ३५ ॥ नमोधृष्णवेचप्रमृशायचनमोनिषङ्गिणेचेषुधिमतेचनमस्तीक्ष्णेष-
वेचायुधिनेचनमः स्वायुधायचसुधन्वनेच ॥ ३६ ॥ नमः स्रुत्यायचपथ्याय
चनमः काट्यायचनीप्यायचनमः कुल्यायचसरस्यायचनमोनादेयायचवैश-

न्तायचनमः ॥ ३७ ॥ कूप्यायचावट्यायचनमोवीद्ध्यायचातप्यायचनमो-
मेघ्यायचविद्युत्यायचनमोवर्ष्यायचावर्ष्यायच ॥ ३८ ॥ नमोवात्यायचरेष्म्या-
यचनमोवास्तव्यायचवास्तुपायचनमः सोमायचरुद्रायचनमस्ताम्रायचारुणाय-
च ॥ ३९ ॥ नम÷ शङ्गवेचपशुपतयेचनमऽउग्रायचभीमायचनमोग्रेवधाय-
चदूरेवधायचनमोहन्त्रेचहनीयसेचनमोवृक्षेभ्योहरिकेशेभ्योनमस्ताराय ॥ ४० ॥
नम ÷ शम्भवायचमयोभवायचनम ÷ शङ्करायचमयस्करायचनम ÷ शिवायच-
शिवतरायच ॥ ४१ ॥ नमः पार्य्यायचावार्य्यायचनम÷प्रतरणायचोत्तरणाय-
चनमस्तीर्त्थ्यायचकूल्यायचनम ÷ शष्प्यायचफेन्यायचनम÷ ॥ ४२ ॥ सिक-
त्यायचप्रवाह्यायचनम ÷ किंशिलायचक्षयणायचनम ÷ कपर्द्दिनंचपुलस्तयेच-
नमऽइरिण्यायचप्रपत्थ्यायच ॥ ४३ ॥ नमोव्रज्यायचगोष्ठ्यायचनमस्त-
ल्प्यायचगेह्यायचनमोहृदय्यायचनिवेष्प्यायचनमः काट्यायचगह्वरेष्ठायचनमः

॥ ४४ ॥ शुष्क्यायचहरित्यायचनम ÷ पाᳪसव्यायचरजस्यायचनमोलोप्याय-
चोलप्यायचनमऽऊर्व्यायचसूर्व्यायचनम ÷ ॥ ४५ ॥ पर्णायचपर्णसदायच-
नमऽउद्गुरमाणायचाभिघ्नतेचनमऽआखिदतेचप्रखिदतेचनमऽइषुकृद्भ्योधनु-
ष्कृद्भ्यश्चवोनमोनमोवः किरिकेभ्योदेवानाᳪहृदयेभ्योनमोविचिन्वत्केभ्यो-
नमोविक्षिणत्केभ्योनमऽआनिर्हतेभ्य ÷ ॥ ४६ ॥ द्रापेऽअन्धसस्पतेदरिद्रनी-
ललोहित ॥ आसाम्प्रजानामेषाम्पशूनाम्माभेर्म्मारोङ्मोचनः किञ्चनाममत्
॥ ४७ ॥ इमारुद्रायतवसेकपर्द्दिनेक्षयद्वीरायप्रभरामहेमतीः ॥ यथाशमस-
द्द्विपदेचतुष्पदेविश्वम्पुष्टङ्ग्रामेऽअस्मिन्ननातुरम् ॥ ४८ ॥ यातेरुद्रशिवातनूः
शिवाविश्वाहाभेषजी ॥ शिवारुतस्यभेषजीतयानोमृडजीवसे ॥ ४९ ॥
परिनोरुद्रस्यहेतिर्वृणक्तुपरित्वेषस्यदुर्म्मतिरघायोः ॥ अवस्थिरामघवद्भ्यस्त-
नुष्वमीढ्वस्तोकायतनयायमृड । ५० ॥ मीढुष्टमशिवतमशिवोन÷सुमना·

भव ॥ परमेवृक्षऽआयुधन्निधायकृत्तिंवसानऽआचरपिनाकम्बिभ्रदागहि ॥५१॥ विकिरिद्रविलोहितनमस्तेऽअस्तुभगवः ॥ यास्तेसहस्रꣳहेतयोन्यमस्मन्निवपन्तुताः । ५२ ॥ सहस्राणिसहस्रशोबाह्वोस्तवहेतयः तासामीशानोभगवः पराचीनामुखाकृधि ॥ ५३ ॥ असंख्यातासहस्राणियेरुद्राऽअधिभूम्याम् । तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ ५४ ॥ अस्मिन्महत्यर्णवेन्तरिक्षेभवाऽअधि ॥ तेषाꣳसह० । ५५ ॥ नीलग्ग्रीवाः शितिकण्ठादिवꣳरुद्राऽउपश्रिताः ॥ तेषाꣳसह० ॥ ५६ ॥ नीलग्ग्रीवाः शितिकण्ठाः शर्वाऽअधः क्षमाचराः ॥ तेषाꣳसह० ॥ ५७ ॥ येवृक्षेषुशष्पिञ्जरानीलग्ग्रीवाविलोहिताः ॥ तेषाꣳसह० ॥ ५८ ॥ येभूतानामधिपतयोविशिखासः कपर्दिनः ॥ तेषाꣳसह० ॥५९॥ येपथाम्पथिरक्षयऽऐलबृदाऽआयुर्य्युधः ॥ तेषाꣳसह० ॥६० । येतीर्थानिप्रचरन्तिसृकाहस्तानिषङ्गिणः ॥ तेषाꣳसह० ॥ ६१ ॥ येन्नेषु-

विविध्यन्तिपात्रेषुपिबतोजनान् ॥ तेषाᳪंसह० ॥ ६२ ॥ यऽएतावन्तश्च-
भूयाᳪंसश्चदिशोरुद्रावितस्थिरे ॥ तेषाᳪंसह० ॥ ६३ ॥ नमोस्तुरुद्रेभ्यो-
येदिवियेषांवर्षमिषवः ॥ तेभ्योदशप्राचीर्दशदक्षिणादशप्रतीचीर्दशोदीची-
र्दशोर्द्ध्वाः ॥ तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनो-
द्वेष्टितमेषाञ्जम्भेदध्मः ॥ ६४ ॥ नमोस्तुरुद्रेभ्योयेन्तरिक्षेयेषांवातऽइषवः ॥
तेभ्योदशप्राचीर्दशदक्षिणादशप्रतीचीर्दशोदीचीर्दशोर्ध्वाः ॥ तेभ्योनमोऽ-
अस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥ ६५ ॥
नमोस्तुरुद्रेभ्योयेपृथिव्यांयेषामन्नमिषवः ॥ तेभ्योदशप्राचीर्दशदक्षिणा-
दशप्रतीचीर्दशोदीचीर्दशोर्ध्वाः ॥ तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तु-
तेयन्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥ ६६ ॥

॥ इति पितृसूक्तम् ॥

श्रीः

ॐरामाय नमः

रामगीता

श्रीमहादेव उवाच—

ततो जगन्मङ्गलमङ्गलात्मना विधाय रामायणकीर्त्तिमुत्तमाम् ।
चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्यैरभिसेवितं यथा ॥ १ ॥
सौमित्रिणा पृष्ट उदारबुद्धिना रामः कथाः प्राह पुरातनी शुभाः ।
राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमथाह राघवः ॥ २ ॥
कदाचिदेकान्त उपस्थितं प्रभुं रामं रमालालितपादपङ्कजम् ।
सौमित्रिरासादितशुद्धभावनः प्रणम्य भक्त्या विनयान्वितोऽब्रवीत् ॥ ३ ॥

सौमित्रिरुवाच—

त्वं शुद्धबोधोऽसि हि सर्वदेहिनामात्मास्यधीशोऽसि निराकृतिः स्वयम् ।
प्रतीयसे ज्ञानदृशां महामते पादाब्जभृङ्गाहितसङ्गसङ्गिनाम् ॥ ४ ॥
अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भवापवर्गं तव योगिभावितम् ।
यथाञ्जसाज्ञानमपारवारिधिं सुखं तरिस्यामि तथाऽनुशाधि माम् ॥ ५ ॥
श्रुत्वाऽथ सौमित्रिवचोऽखिलं तदा प्राह प्रपन्नार्तिहरः प्रसन्नधीः ।
विज्ञानमज्ञानतमः प्रशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः ॥ ६ ॥

श्रीरामचन्द्र उवाच—

आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्धमानसः ।
समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत् सद्गुरुमात्मलब्धये ॥ ७ ॥
क्रिया शरीरोद्भवहेतुरादृता प्रियाप्रियौ तौ भवतः सुरागिणः ।

धर्मेतरौ तत्र पुनः शरीरकं पुनः क्रिया चक्रवदीर्यते भवः ॥ ८ ॥
अज्ञानमेवास्य हि मूलकारणं तद्धानमेवाऽत्र विधौ विधीयते ।
विद्यैव तन्नाशविधौ पटीयसी न कर्म तज्जं सविरोधमीरितम् ॥ ९ ॥
नाज्ञानहानिर्नं च रागसंक्षयो भवेत्ततः कर्म सदोषमुद्भवेत् ।
ततः पुनः संसृतिरप्यवारिता तस्माद्बुधो ज्ञानविचारवान्भवेत् ॥१०॥
ननु क्रिया वेदमुखेन चोदिता तथैव विद्या पुरुषार्थसाधनम् ।
कर्तव्यता प्राणभृतः प्रचोदिता विद्यासहायत्वमुपैति सा पुनः ॥११॥
कर्माकृतौ दोषमपि श्रुतिर्जगौ तस्मात्सदा कार्यमिदं मुमुक्षुणा ।
ननु स्वतन्त्रा ध्रुवकार्यकारिणी विद्या न किञ्चिन्मनसाप्यपेक्षते ॥१२॥
न सत्यकार्योऽपि हि यद्वदध्वरः प्रकाङ्क्षतेऽन्यानपि कारकादिकान् ।
तथैव विद्या विधितः प्रकाशितैर्विशिष्यते कर्मभिरेव मुक्तये ॥१३॥

केचिद्वदन्तीति वितर्कवादिन-स्तदप्यसद्दृष्टविरोधकारणात् ।
देहाभिमानादभिवर्धते क्रिया विद्यागताहङ्कृतितः प्रसिद्ध्यति ॥१५॥
विशुद्धविज्ञानविरोचनाञ्चिता विद्यात्मवृत्तिश्चरमेति भण्यते ।
उदेति कर्माखिलकारकादिभिर्निहन्ति विद्याखिलकारकादिकम् ॥१५॥
तस्मात् त्यजेत् कार्यमशेषतः सुधीर्विद्याविरोधान्न समुच्चयो भवेत् ।
आत्मानुसन्धानपरायणः सदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः ॥१६॥
यावच्छरीरादिषु माययात्मधीस्तावद्विधेयो विधिवादकर्मणाम् ।
नेतीतिवाक्यैरखिलं निषिध्य तज्ज्ञात्वा परात्मानमथ त्यजेत्क्रियाः ॥१७।
यदा परात्मात्मविभेदभेदकं विज्ञानमात्मन्यवभाति भास्वरम् ।
तदैव माया प्रविलीयतेऽञ्जसा सकारका कारणमात्मसंसृतेः ॥१८॥
श्रुतिप्रमाणाभिविनाशिता च सा कथं भविष्यत्यपि कार्यकारिणी ।

विज्ञानमात्रादमला द्वितीयतस्तस्मादविद्या न पुनर्भविष्यति ॥१९॥
यदि स्म नष्टा न पुनः प्रसूयते कर्ताहमस्येति मतिः कथं भवेत् ।
तस्मात् स्वतन्त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केवला ॥२०॥
सा तैत्तिरीयश्रुतिराह सादरं न्यासं प्रशस्ताखिलकर्मणां स्फुटम् ।
एतावदित्याह च वाजिनां श्रुतिर्ज्ञानं विमोक्षाय न कर्म साधनम् ।२१॥
विद्यासमत्वेन तु दर्शितस्त्वया क्रतुर्न दृष्टान्त उदाहृतः समः ।
फलैः पृथक्त्वाद् बहुकारकैः क्रतुः संसाध्यते ज्ञानमतो विपर्ययम् ॥२२॥
स प्रत्यवायो ह्यहमित्यनात्मधीरज्ञप्रसिद्धा न तु तत्त्वदर्शिनः ।
तस्माद् बुधैः त्याज्यमविक्रियात्मभिर्विधानतः कर्मविधिप्रकाशितम् ॥२३॥
श्रद्धान्वितस्तत्त्वमसीति वाक्यतो गुरोः प्रसादादपि शुद्धमानसः ।
विज्ञाय चैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकम्पनः ॥२४॥

आदौ पदार्थावगतिर्हि कारणं वाक्यार्थविज्ञानविधौ विधानतः ।
तत्त्वं पदार्थौ परमात्मजीवकावसीति चैकात्म्यमथानयोर्भवेत् ॥२५॥
प्रत्यक्परोक्षादिविरोधमात्मनोर्विहाय संगृह्य तयोश्चिदात्मताम् ।
संशोधितां लक्षणया च लक्षितां ज्ञात्वा स्वमात्मानमथाद्वयो भवेत् ॥२६॥
एकात्मकत्वाज्जहती न संभवेत् तथाजहल्लक्षणता विरोधतः ।
सोऽयं पदार्थाविव भागलक्षणा युज्येत तत्त्वं पदयोरदोषतः ॥२७॥
रसादिपञ्चीकृतभूतसम्भवं भोगालयं दुःखसुखादिकर्मणाम् ।
शरीरमाद्यन्तवदादिकर्मजं मायामयं स्थूलमुपाधिमात्मनः ॥२८॥
सूक्ष्मं मनोबुद्धिदशेन्द्रियैर्युतं प्राणैरपञ्चीकृतभूतसम्भवम् ।
भोक्तुः सुखादेरनुसाधनं भवेच्छरीरमन्यद्विदुरात्मनो बुधाः ॥२९॥
अनाद्यनिर्वाच्यमपीह कारणं मायाप्रधानं तु परं शरीरकम् ।

उपाधिभेदात्तु यतः पृथक् स्थितं स्वात्मानमात्मन्यवधारयेत्क्रमात् ॥३०॥
कोशेष्वयं तेषु तु तत्तदाकृतिर्विभाति सङ्गात्स्फटिकोपलो यथा ।
असङ्गरूपोऽयमजो यतोऽद्वयो विज्ञायतेऽस्मिन् परितो विचारिते ॥३१॥
बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादिभेदेन गुणत्रयात्मनः ।
अन्योऽन्यतोऽस्मिन् व्यभिचारतो मृषा नित्ये परे ब्रह्मणि केवले शिवे ॥३२॥
देहेन्द्रियप्राणमनश्चिदात्मनां सङ्घादजस्रं परिवर्तते धियः ।
वृत्तिस्तमोमूलतयाज्ञलक्षणा यावद्भवेत् तावदसौ भवोद्भवः ॥३३॥
नेति प्रमाणेन निराकृताखिलो हृदा समास्वादितचिद्घनामृतः ।
त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाम्भः प्रजहाति तत्फलम् ॥३४॥
कदाचिदात्मा न मृतो न जायते न क्षीयते नापि विवर्धतेऽनवः ।
निरस्तसर्वातिशयः सुखात्मकः स्वयंप्रभः सर्वगतोऽयमद्वयः ॥३५॥

एवं विधे ज्ञानमये सुखात्मके कथं भवो दुःखमयः प्रतीयते ।
अज्ञानतोऽध्यासवशात् प्रकाशते ज्ञाने विलीयेत विरोधतः क्षणात् ॥३६॥
यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुं विपश्चितः ।
असर्पभूतेऽहिविभावनं यथा रज्ज्वादिके तद्वदपीश्वरे जगत् ॥३७॥
विकल्पमायारहिते चिदात्मकेऽहङ्कार एषः प्रथमः प्रकल्पितः ।
अध्यास एवात्मनि सर्वकारणे निरामये ब्रह्मणि केवले परे ॥३८॥
इच्छादिरागादिसुखादिधर्मिकाः सदा धियः संसृतिहेतवः परे ।
यस्मात् प्रसुप्तौ तदभावतः परः सुखस्वरूपेण विभाव्यते हि नः ॥३९॥
अनाद्यविद्योद्भवबुद्धिबिम्बितो जीवः प्रकाशोऽयमितीर्यते चितः ।
आत्मा धियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः स एव हि॥४०॥
चिद्बिम्बसाक्ष्यात्मधियां प्रसंगतस्त्वेकत्र वासादनलाक्तलोहवत् ।

अन्योन्यमध्यासवशात्प्रतीयते जडाजडत्वं च चिदात्मचेतसोः ॥४१॥
गुरोः सकाशादपि वेदवाक्यतः सञ्जातविद्यानुभवो निरीक्ष्य तम् ।
स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥४२॥
प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद् विभातोऽहमतीव निर्मलः ।
विशुद्धविज्ञानघनो निरामयः सम्पूर्ण आनन्दमयोऽहमक्रियः ॥४३॥
सदैव मुक्तोऽहमचिन्त्यशक्तिमानतीन्द्रियज्ञानमविक्रियात्मकः ।
अनन्तपारोऽहमहर्निशं बुधैर्विभावितोऽहं हृदि वेदवादिभिः ॥४४॥
एवं सदात्मानमखण्डितात्मना विचारमाणस्य विशुद्धभावना ।
हन्यादविद्यामचिरेण कारकै-रसायनं यद्वदुपासितं रुजः ॥४५॥
विविक्त आसीन उपारतेन्द्रियो विनिर्जितात्मा विमलान्तराशयः ।
विभावयेदेकमनन्यसाधनो विज्ञानदृक्केवल आत्मसंस्थितः ॥४६॥

विश्वं यदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे ।
पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्यं न च किञ्चिदान्तरम् ॥४७॥
पूर्वं समाधेरखिलं विचिन्तयेदोङ्कारमात्रं सचराचरं जगत् ।
तदेव वाच्यं प्रणवो हि वाचको विभाव्यतेऽज्ञानवशान्न बोधतः ॥४८॥
अकारसंज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजस ईर्यते क्रमात् ।
प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधिपूर्वं न तु तत्त्वतो भवेत् ॥४९॥
विश्वं त्वकारं पुरुषं विलापयेदुकारमध्ये बहुधा व्यवस्थितम् ।
ततो मकारे प्रविलाप्य तैजसम् द्वितीयवर्णं प्रणवस्य चान्तिमे ॥५०॥
मकारमप्यात्मनि चिद्घने परे विलापयेत् प्राज्ञमपीह कारणम् ।
सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽमलः ॥५१॥
एवं सदा जातपरात्मभावनः स्वानन्दतुष्टः परिविस्मृताखिलः ।

आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसिन्धुवत् ।।५२।।
एवं सदाभ्यस्तसमाधियोगिनो निर्वृत्तसर्वेन्द्रियगोचरस्य हि ।
विनिर्जिताशेषरिपोरहं सदा दृश्यो भवेयं जितषड्गुणात्मनः ।।५३।।
ध्यात्वैवमात्मानमहर्निशं मुनिस्तिष्ठेत् सदा मुक्तसमस्तबन्धनः ।
प्रारब्धमश्नन्नभिमानवर्जितो मय्येव साक्षात् प्रविलीयते ततः ।।५४।।
आदौ च मध्ये च तथैव चान्ततो भवं विदित्वा भयशोककारणम् ।
हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मानमथाखिलात्मनाम् ।।५५।।
आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयात्मना तदा ।
यथा जलं वारिनिधौ यथा पयः क्षीरे वियद्व्योम्न्यनिले यथानिलः ।।५६।।
इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेति विभावयन्मुनिः ।
निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेन्दुभेदो दिशि दिग्भ्रमादयः ।।५७।।

यावन्न पश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् ।
श्रद्धालुरत्यूर्जितभक्तिलक्षणो यस्तस्य दृश्योऽहमहर्निशं हृदि ॥५८॥
रहस्यमेतच्छ्रुतिसारसंग्रहं मया विनिश्चित्य तवोदितं प्रिय !
यस्त्वेतदालोचयतीह बुद्धिमान् स मुच्यते पातकराशिभिः क्षणात् ॥५९॥
भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा ।
मद्भावनाभावितशुद्धमानसः सुखी भवानन्दमयो निरामयः ॥६०॥
यः सेवते मामगुणं गुणात्परं हृदा कदा वा यदि वा गुणात्मकम् ।
सोऽहं स्वपादाश्रितरेणुभि स्पृशन् पुनाति लोकत्रितयं यथा रविः ॥६१॥
विज्ञानमेतदखिलं श्रुतिसारमेकं वेदान्तवेद्यचरणेन मयैव गीतम् ।
यः श्रद्धया परिपठेद् गुरुभक्तियुक्तो मद्रूपमेति यदि मद्वचनेषु भक्तिः ॥६२॥

इति श्रीमदध्यात्मरामायणोक्तोत्तरकाण्डान्तर्गता रामगीता सम्पूर्णा ।

❀ श्रीरामचन्द्रार्पणमस्तु ❀

अरु सबै धार्मिक पुस्तकहरुको लागि सम्झनुहोस

नेपालको लागि मुख्य वितरक :

रत्न पुस्तक भण्डार

भोटाहिटी, काठमाडौं,

नेपाल